B.A. Sanskrit
Year – I
Semester – II
Paper – IV

# मध्यमव्यायोगः
# Madhyamavyayoga

## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

**पाठ्यपरिचयः**

संस्कृतसाहित्ये काव्यस्य एकं निर्दिष्टं स्वरूपं वर्तते। तत्काव्यं सामान्यतः दृश्यश्रव्यभेदत्वेन द्विधा विभज्यते। दर्शनयोग्यं काव्यं दृश्यम्, श्रवणयोग्यम्-काव्यं श्रव्यम्। अस्मिन् पत्रे दृश्यकाव्यान्तर्गतस्य एकः भेदः व्यायोगः इति नाम्ना (कश्चन भेदः) मध्यमव्यायोगः ग्रन्थः पाठ्यते। महाभारतासृत्य भीमसेनस्य चतित्रमाध्यमेन एकां पौराणिकीं कथां शास्त्रिकक्षायां पाठ्यते।

## प्रथमः खण्डः – भासपरिचयः, देशः, कालः, अन्याः कृतयः।

अस्मिन् खण्डे व्यायोगस्य प्रारम्भे अस्य ग्रन्थस्य कर्तुः परिचयः दीयते। तत्र भासस्य परिचयः, देशः, तस्य कालः एवञ्च तेन विरचितानि नाटकानि उपक्रममाध्यमेन सूच्यते। अनेन भाषरचितस्य नाटकचक्रस्य उपस्थापनमपि छात्राणां ज्ञानाभिवर्धनाय क्रियते।

## द्वितीयः खण्डः – रूपकपरिचयः, उत्पत्तिः विकासश्च, दशरूपकभेदाः, व्यायोगस्य वैशिष्ट्यम्

अस्मिन् खण्डे रूपकस्य परिचयः दीयते। आलङ्कारिकानां मतं दृष्ट्वा अस्य रूपकस्य उत्पत्तिविकाशसम्बन्धितस्य तथ्यस्य चर्चा क्रियते। तत्रापि आचार्यधननजयेन प्रणीतस्य दशरूपकग्रन्थस्य उल्लेखः क्रियते। तस्मिन् ग्रन्थे कथितानां दशरूपकभेदानां परिचयप्रदानेन व्यायोगस्य स्वरूपमपि छात्राणां सम्मुखे उपस्थाप्यते।

## तृतीयः खण्डः – मध्यमव्यायोगस्य पूर्वार्धः

अस्मिन् खण्डे मध्यमव्यायोगे वर्णितकथावस्तुनः विशेषतः प्रथमभागः पाठ्यते। तत्रापि केशवदाशस्य ब्राह्मणस्य मध्यमपुत्रस्य दुर्दशा नाट्यकारेण यथा वर्णिता तद् ग्रन्थाधारेण छात्राणां सम्मुखे उपसस्थाप्यते।

**चतुर्थः खण्डः – मध्यमव्यायोगस्य उत्तरार्धः**

अस्मिन् खण्डे मध्यमव्यायोगस्य उत्तरभागः पाठ्यते। तत्र भीमसेनस्य उपस्थितिः तेन केशवदाशपुत्रेण मेलनम्, घटोत्कचेन साकं सम्भाषणम्, उभयोः युद्धवर्णननम् इत्यादिविषयाः उपस्थाप्यते। अन्तिमे भीमसेनस्य हिडिम्बया साकं मेलनं केशवदाशस्य मध्यमपुत्रस्य रक्षणं घटोत्कचस्य पित्रा साकं मेलनम् इत्यादिविषयाः समालोच्यते। भारतवाक्येन व्यायोगस्य समाप्तिः जायते।

**पञ्चमः खण्डः – रसाः-, अलङ्काराः, छन्दांसि, पात्रपरिशीलनम्, मूलवस्तुविवेचनम्**

अस्मिन् खण्डे मध्यमव्यायोगे प्रयुक्तानां विविधरसादीनां चर्चा परिलक्षते। दृश्यकाव्यस्य सौन्दर्याभिवर्धनाय विविधान् अलङ्कारान् प्रयोगपूर्वकं नाट्यकारेण व्यायोगस्य महनीयता प्रतिपादिता। धन्दशास्त्रस्य स्पर्शः अपि क्षणे क्षणे द्रष्टुं शक्यते। व्यायोगे उल्लिखितानां विविधपात्राणां परिशीलनमपि ग्रन्थाधारेण क्रियते। अस्य व्यायोगस्य आधारग्रन्थत्वेन महाभारतस्य चर्चा अस्मिन् खण्डे क्रियते।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | भाषपरिचयः, देशः, कालः, अन्याः कृतयः। | 5-15 |
| द्वितीयः | रूपकपरिचयः, उत्पत्तिः विकासश्च, दशरूपकभेदाः, व्यायोगस्य वैशिष्ट्यम् | 16-25 |
| तृतीयः | मध्यमव्यायोगस्य पूर्वार्धः | 26-57 |
| चतुर्थः | मध्यमव्यायोगस्य उत्तरार्धः | 58-97 |
| पञ्चमः | रसाः-, अलङ्काराः, छन्दांसि, पात्रपरिशीलनम्, मूलवस्तुविवेचनम् | 98 |

# खण्डः १

**पाठरचना**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

**प्रस्तावना-**

अस्मिन् खण्डे व्यायोगस्य प्रारम्भे अस्य ग्रन्थस्य कर्तुः परिचयः दीयते। तत्र भासस्य परिचयः, देशः, तस्य कालः एवञ्च तेन विरचितानि नाटकानि उपक्रममाध्यमेन सूच्यते। अनेन भाषरचितस्य नाटकचक्रस्य उपस्थापनमपि छात्राणां ज्ञानाभिवर्धनाय क्रियते।

**उद्देश्यम्**

- नाट्यकारभासस्य परिचयज्ञानम्
- नाट्यकारभासस्य देशकालपरिज्ञानम्।
- नाट्यकारभासस्य कृतीनां परिचयः छात्रैः ज्ञातुं शक्यते।

* नाट्यकारभासस्य काव्यशैलीज्ञानम्

**महाकवेः भासस्य जीवनवृत्तम्**

संस्कृतकविषु भासस्यापि जीवनवृत्तं रहस्यमयमस्ति । भासस्यापि विषये विभिन्नाः किम्वदन्त्यः श्रूयन्ते । परम् ऐतिहासिकदृष्ट्या विचारेण भासः कालिदासात् पूर्ववर्तीति सिद्ध्यति । भासस्य सर्वप्रथमम् उल्लेखः महाकविकालिदासेन मालविकाग्निमित्रम् इति नाटकस्य प्रस्तावनायां सौमिल्लक-कविपुत्रनामकाभ्यां नाटककाराभ्यां सह कृतः दृश्यत इति पूर्वमेव प्रतिपादितमस्ति । बाणभट्टादयः कवयस्तु कालिदासादपि अर्वाचीनाः इति न कस्यापि सन्देहः। कालिदासः विक्रमादित्यस्य नवरत्नेषु अन्यतमं रत्नं तस्य सभापण्डित आसीत् इति विक्रमोर्वशीयस्य सूत्रधारोक्तेः लभ्यते । विक्रमादित्यः नवीनसंवत्सरस्य प्रतिष्ठापकः तथा क्रिस्तात् ५७ वर्षेभ्यः पूर्ववर्ती आसीत्।

**यान् याज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति ।**

**क्षणेन तानप्यतियान्ति शूराः प्राणान्सुयुद्धेषु परित्यजन्तः ॥ १ ॥**

**नवं शरालं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।**

**तत्तस्य माभून्नरकं च गच्छेद्यो भर्तृपिण्डस्य कृते न युध्येत् ॥ २ ॥**

अत्र प्रतिपादितं द्वितीयं पद्यं भासस्य प्रतिज्ञायौगन्धरायणात् उद्धृतम् । एतेन एवं प्रतीयते यद् भासः कौटिल्यादपि पूर्ववर्ती वर्तते । कौटिल्यस्य कालः विद्वद्भिः ४५७ ईशवीयवर्षपूर्वम् स्वीकृतमस्ति । अतः भासः ईशापूर्ववर्षात् ४५७ तः अपि पूर्ववर्ती आसीदिति निश्चप्रचम् । किं च भासेन बार्हस्पत्यम् अर्थशास्त्रमिति लिखितं, न तु कौटिलीयम् अर्थशास्त्रम् इति। तथा च माहेश्वरं योगशास्त्रमिति लिखितं न तु पातञ्जलं योगशास्त्रमिति। एतेन भासः कौटिल्यात् पूर्ववर्ती इति निर्विवादं सिद्ध्यति । एवं विविधबाह्यपरीक्षणैः कतिपयान्तरङ्गपरीक्षणैश्चायं भासस्य कालः ईशापूर्वं षष्ठशतकं पञ्चमशतकं वा ( ६ सी. बी. सी. / ५ सी. बी. सी. ) भवितुमर्हति ।

भासस्य जीवनवृत्तम् अद्यावधि रहस्यावृतमिव तिष्ठति । यतो हि न तेन क्वचिदपि स्वजीवनवृत्तं साक्षात् वर्णितम् अस्ति, न वा तदीयग्रन्थेषु परोक्षतयाऽपि किमपि निर्दिष्टमस्ति। कविवरः भासः वेदादिशास्त्रेषु निष्णातः, ब्राह्मणवंशस्यालङ्काररूपः इव प्रतीयते । तस्य रचनासु ज्ञायते यत् बहुषु देशेषु तेन पर्यटनं विहितम् । अपरिमितप्रतिभया मण्डितः आसीत् भासः इति निर्विवादः । अस्य रचनासु उज्जयिन्याः वर्णनं चर्चा च अधिकं दृश्यते इति अयं उज्जयिनीस्थ आसीदिति अनुमीयते । कैश्चिदुच्यते हिमवद्विन्ध्यकुण्डलाम् इत्युक्त्याऽसौ उत्तरभारतीयः आसीदिति ।

**महाकवेः भासस्य कृतीनां परिचयः**

भासेन त्रयोदश (१३) रूपकाणि लिखितानि सन्ति । तानि भवन्ति-

१. प्रतिमानाटकम्, २. अभिषेकनाटकम्, ३. उरुभङ्गम्, ४. दूतघटोत्कचम्, ५. दूतवाक्यम्, ६. कर्णभारः, ७. मध्यमव्यायोगः, ८. पञ्चरात्रम्, ९. बालचरितम्, १०. अविमारकम्, ११. चारुदत्तम्, १२. प्रतिज्ञायौगन्धरायणम्, १३. स्वप्नवासवदत्तम् च।

एतेषां रूपकाणां कथावस्तु निम्नप्रकारेण प्रस्तूयते ।

**१. प्रतिमानाटकम्-** अस्मिन् नाटके सप्त अङ्काः सन्ति। श्रीरामस्य वनयात्रातः रावणवधपर्यन्तं घटनाः अत्र वर्णिताः सन्ति । रामस्य विरहेण पीडितः महाराजः दशरथः मृतः। ततः रघुवंशस्य देवमन्दिरे तस्य प्रतिमूर्तिः स्थापिता । मातुलालयात् प्रत्यागच्छन् भरतः तस्मिन् देवमन्दिरे पितामहादिभिः सह निजपितुः दशरथस्य अपि प्रतिमां दृष्ट्वा स्वपितुः मृत्युम् अजानत्। अतः दशरथस्य प्रतिमादर्शनद्वारा तन्मृत्युज्ञानकारणात् अस्य नाटकस्य नाम प्रतिमानाटकम् इति स्थापितम् । अत्र रङ्गभूमौ राज्ञः दशरथस्य मृत्युं प्रदर्श्य कविना नाट्यशास्त्रविरुद्धं समाचरितम् ।

**२. अभिषेकनाटकम्-** अस्मिन् नाटके षड् अङ्काः सन्ति । रामायणस्य किष्किन्ध्याकाण्ड-सुन्दरकाण्ड - युद्धकाण्डेषु वर्णितं रामस्य चरित्रमाधारीकृत्य कविना इदं नाटकं लिखितम्। श्रीरामचन्द्रस्य लङ्कातः अयोध्यां प्रति आगमनात् परं देवैः तस्य राज्याभिषेकः कृतः । एवम् अस्य नाटकस्य नाम अभिषेकनाटकमिति जातम् । अत्रापि भासेन रङ्गभूमौ बालिवधं प्रदर्श्य नाट्यशास्त्रविरुद्धं समाचरितम् ।

**३. उरुभङ्गम्-** अस्मिन् रूपके एक: अङ्कः वर्तते । भीमसेनेन गदायुद्धे दुर्योधनस्य उरुभङ्गः विहितः इति कथावस्तु अत्र वर्णितम् अस्ति । अत्रापि नाट्यशास्त्रनियमानाम् उल्लङ्घनं दृश्यते।

**४. दूतघटोत्कचम् -** अस्मिन् अपि रूपके एकः अङ्कः वर्तते । महाभारतस्य युद्धे यदा कौरवपक्षस्य बहुभिः वीरैः अन्यायपूर्वकम् अर्जुनपुत्रः अभिमन्युः मारितः तदा श्रीकृष्णेन प्रेरितः भीमसेनस्य पुत्रः घटोत्कचः दुर्योधनस्य सभायां पाण्डवानां दूतरूपेण प्राप्तः । दुर्योधनेन घटोत्कचं प्रति उक्तं कृष्णं प्रति मम सन्देशं श्रावय यत् - भवान् पाण्डवानां पक्षग्रहणं करोतु, अहं बाणद्वारा तस्योत्तरं प्रदास्यामि इति । अस्मिन् रूपके आधिक्येन कविकल्पनाद्वारा कथावस्तु निबद्धमस्ति ।

**५. दूतवाक्यम्-** इदम् एकाङ्कि रूपकम् । कौरव-पाण्डवयोः युद्धात्पूर्वं दुर्योधनस्य सभायां यद् दौत्यं सम्पादितं तद् रूपकेऽस्मिन् वर्णितम्। अस्मिन् रूपके प्राकृतभाषायाः प्रयोगः न दृश्यते ।

**६. कर्णभारः-** कर्णभारः अपि एकेन एव अङ्केन निबद्धः अस्ति । अत्र छलपूर्वकं ब्राह्मणवेशं धृत्वा इन्द्रः याचकरूपेण कर्णस्य समीपे आगच्छति। कर्णश्च तस्मै अभिप्रायानुरूपं कवचकुण्डलानि ददाति । इदं कथावस्तु अत्र कविना वर्णितमस्ति ।

**७. मध्यमव्यायोगः** - अस्मिन् अपि रूपके एक एवाङ्कः अस्ति । पाण्डवानां वनवासकाले भीमसेनपुत्रः घटोत्कचः एकस्य वृद्धब्राह्मणस्य मध्यमपुत्रं स्वमातुः हिडिम्बायाः भोजनाय ग्रहीतुमिच्छति । मध्यमपाण्डवः भीमसेनश्च युद्धे घटोत्कचं पराजित्य ब्राह्मणपुत्रं घटोत्कचात् मोचयति । अन्ते च प्रियया हिडिम्बया पुत्रेण घटोत्कचेन च तस्य मिलनं भवति । इयं कथा अस्मिन् रूपके निबद्धा अस्ति ।

**८.पञ्चरात्रम्-** अस्मिन् रूपके त्रयः अङ्काः सन्ति । दुर्योधनः यज्ञमारभते । यज्ञस्यान्ते सः दक्षिणारूपेण द्रोणाचार्याय तदभीष्टं वस्तु दातुं तत्परो भवति । तदा द्रोणाचार्यः पाण्डवेभ्यः अर्धं राज्यं दातुं स्वेच्छां प्रकटितवान् । तदनन्तरं शकुनेः परामर्शानुसारं दुर्योधनः पञ्चसु रात्रिषु पाण्डवानां समाचारज्ञानेन तेभ्यः राज्यार्धं दातुम् सम्मतो भवति। एतदन्तरा विराटनगरात् समागतात् दूतात् शतसंख्यकानां कीचकानां वधवृत्तान्तमासाद्य भीमं विहाय नान्यः एतादृशं कर्म कोऽपि कर्तुमर्हतीति ज्ञात्वा द्रोणाचार्यः तस्य पणं स्वीकरोति । यज्ञे भागग्रहणं नैव कृतमिति भीष्मद्रोणदुर्योधनादयः विराटनगरं प्रति गवां हरणाय प्रस्थिताः । तान् च वृहन्नलावेशधारी अर्जुनः अजयत् । दुर्योधनादयश्च ततः पलायिताः । तदनन्तरम् अज्ञातवेशे स्थितान् पाण्डवान् ज्ञात्वा विराटदेशस्य राजा अर्जुनाय स्वपुत्रीम् उत्तरां दातुम् ऐच्छत् । अर्जुनश्च निजपुत्राय अभिमन्यवे उत्तरां स्वीकृतवान् । तदा विराटपुत्रः उत्तरः उत्तराऽभिमन्योः विवाहवृत्तान्तं ज्ञापयितुं भीष्मस्य समीपं प्रेषितः । तस्माच्च पाण्डवानां समाचारः द्रोणाचार्येण प्राप्तः । एवं पञ्चरात्राभ्यन्तरे पण्डवानां समाचारं प्राप्य दुर्योधनः स्वप्रतिज्ञानुसारं पाण्डवेभ्यः राज्यार्धं प्रयच्छति । इयं कथा कविकल्पिता अस्ति ।

**९. बालचरितम्** - अस्मिन् रूपके पञ्च अङ्काः सन्ति । श्रीमद्भागवतस्य कथावस्तु आधारीकृत्य कविना इदं रूपकं निर्मितमस्ति । भगवतः कृष्णस्य जन्मतः आरभ्य कंसवधपर्यन्तं कथा अत्र निबद्धा अस्ति । अत्रापि कविना युद्धं कंसवधं च प्रदर्श्य नाट्यशास्त्रपरम्परा लङ्घिता दृश्यते ।

**१०. अविमारकम्** - अस्मिन् नाटके षड् अङ्काः सन्ति । चण्डभार्गवनामकस्य क्रोधिनः नृपतेः शापेन श्वपाकावस्थां प्राप्तः सौवीरराजः कुन्तिभोजस्य नगरे पुत्रपत्नीभ्यां सह प्रच्छन्नरूपेण अवसत्। अस्य पुत्रः विष्णुसेनः अवि (मेष) रूपधारिणं दैत्यं मारयित्वा अविमारकः इति नाम्ना प्रसिद्धः । सः स्वमातुः कुन्तीभोजस्य पुत्रीं कुरङ्गीं मदोन्मत्तात् गजाद् अरक्षत् एवम् अत्र विष्णुसेनकुरङ्ग्योः प्रणयवृत्तान्तः वर्णितः अस्ति।

**११. चारुदत्तम्**- अस्मिन् रूपके चत्वारः अङ्काः सन्ति । अत्र कस्यचिद्वणिक्पुत्रस्य उदारचरित्रस्य ब्राह्मणस्य चारुदत्तस्य उज्जयिन्याः प्रसिद्धया वेश्यया वसन्तसेनया सह प्रणयवृत्तान्तः वर्णितः । शूद्रकरचितस्य मृच्छकटिकस्य उपजीव्यग्रन्थत्वेन इदं रूपकं स्वीक्रियते ।

**१२. प्रतिज्ञायौगन्धरायणम्** - अस्मिन् रूपके चत्वारः अङ्काः सन्ति। अत्र वर्णिता कथा स्वप्नवासवदत्तस्य कथायाः पूर्वं घटिता । अत इदं नाटकं स्वप्नवासवदत्तस्य प्रस्तावनारूपेण अङ्गीक्रियते । उज्जयिन्याः राजा प्रद्योतः छलपूर्वकं वत्सराजम् उदयनं वन्दीरूपेण अगृह्णात्। राजा प्रद्योतश्च वीणां शिक्षयितुम् अन्तःपुरे उदयनम् अस्थापयत् । एतद् ज्ञात्वा वत्सराजस्य मन्त्री राजानम् उदयनं मोचयितुं प्रतिज्ञाम् अकरोत् । एवम् अस्य रूपकस्य नाम प्रतिज्ञायौगन्धरायणम् इति नाम अन्वर्थं प्रतीयते । यौगन्धरायणश्च स्वयं बद्धः भूत्वा वासवदत्तया सह उदयनं वत्सराजं प्रापितवान् ।

**१३. स्वप्नवासवदत्तम्** - अस्मिन् रूपके षड् अङ्काः सन्ति । भासस्य कृतौ इदं सर्वश्रेष्ठं रूपकमिति स्वीक्रियते । कथानकदृष्ट्या एतत् रूपकं प्रतिज्ञायौगन्धरायणस्य परिशिष्टरूपमिव भाति। उज्जयिनीतः प्रद्योतकुमार्याः वासवदत्तायाः हरणं कृत्वा स्वराज्यप्राप्तेः परं राजा उदयनः तत्र अत्यासक्तः सन् राजकार्ये

अवहेलां प्रदर्शयति । तेन वत्सराज्यस्याधिकान् भागान् शत्रुः आरुणिः हरति । तान् च हृतान् राज्यभागान् पुनः प्राप्तुं मगधराजस्य पुत्र्या पद्मावत्या सह उदयनस्य विवाहं कारयितुं चिन्तितम् । राज्ञः उदयनस्य मृगयाकाले यौगन्धरायणेन वासवदत्तायाः आत्मनश्च अग्नौ दाहवृत्तान्तः प्रसारितः । ततः यौगन्धरायणः परिव्राजकवेशं धृत्वा अवन्तिकावेशधारिणीं वासवदत्तां मगधराजकुमार्याः पद्मावत्याः समीपे न्यासरूपेण अस्थापयत्। एतदन्तरा पद्मावत्या सह उदयनस्य विवाहः भवति । पद्मावत्या सह विवाहात् परमपि उदयनः वासवदत्तां नैव विस्मरति । तेन पद्मावत्याः शिरोवेदना जायते । तत् श्रुत्वा उदयनः समुद्रगृहकं पद्मावतीं मिलितुं गच्छति । परं तत्र पद्मावतीं न दृष्ट्वा उदयनः तस्यां शय्यायां स्वपिति । पद्मावत्याः शिरोवेदनासमाचारं प्राप्य वासवदत्ता अपि समुद्रगृहकं प्राप्नोति । तत्र च सुप्तं राजानम् उदयनं पद्मावतीं मत्वा तस्यामेव शय्यायाम् उपविशति । राजा स्वप्ने वासवदत्तायाः नाम्नः प्रलापं करोति । तदा वासवदत्ता राजानं परिचिनोति । सा च अनालम्बं राज्ञः हस्तं शय्यायां स्थापयति । वासवदत्तायाः स्पर्शेण तत्परिचयेन तस्याः हस्तं ग्रहीतुं प्रयतते । ततः वासवदत्ता पलायते । एतदन्तरा राजा उदयनः आरुणिं पराजित्य हृतं राज्यं पुनः प्राप्नोति । ततः अवन्तिराज्यात् वासवदत्तायाः उदयनस्य च विवाहस्य चित्रमानीय वासवदत्तायाः धात्री वसुन्धरा तथा कञ्चुकी महासेनस्य वासवदत्तायाः मातुः च सन्देशं नीत्वा आगच्छतः । पद्मावती वासवदत्तायाः चित्रं दृष्ट्वा वदति - अस्याः प्रतिकृत्याः सदृशी इहैव प्रतिवसतीति । तदा राज्ञः उदयनस्य अनुरोधेन पद्मावती अवन्तिकावेशधारिणीं वासवदत्ताम् आह्वयति । परिव्राजकवेशः यौगन्धरायणोऽपि स्वभगिनीं नेतुम् आगच्छति । वासवदत्तां दृष्ट्वा धात्री वसुन्धरा परिचिनोति । यौगन्धरायणश्च राजानं सर्वं वृत्तान्तं श्रावयति । सर्वं रहस्यं हस्तामलकवद् पुरतः स्पष्टं प्रतीयते । राजा उदयनः सपरिवार : प्रद्योतस्य दर्शनाय उज्जयिनीं प्रति प्रस्थितः । अन्ते भरतवाक्येन सह नाटकस्य समाप्तिः भवति ।

तथा हि- एतेषां रूपकाणाम् समानकर्तृकत्वे कतिचित् प्रमाणानि अत्र उपस्थाप्यन्ते ।

१.सर्वाणि अपि इमानि रूपकाणि नान्द्यन्ते ततः प्रविशति सूत्रधारः एभिरेव शब्दैः प्रारभ्यन्ते ।

२.एषु रूपकेषु क्वापि रचयितुः नाम परिचयादिकं नोपलभ्यते ।

३. प्रायः सर्वत्र प्रस्तावनायाः स्थाने स्थापनाशब्दस्य प्रयोगः कृतः दृश्यते ।

४.एषु सर्वत्र भरतवाक्यं समानम् ।

५.एषां रूपकाणां भाषाप्रयोगे साम्यं दृश्यते ।

६.सर्वेषु अपि एषु रूपकेषु पताकास्थानकस्य मुद्रालङ्कारस्य च समानः प्रयोगः दृश्यते।

७.अप्रधानपात्राणां नामसाम्यं, व्याकरणलक्षणहीनानां प्रयोगे प्राचुर्यं, समानं वाक्यं च सर्वत्र बाहुल्येन लभ्यते ।

८.भरतकृतनाट्यशास्त्रीयनियमानां सर्वत्र समभावेन अनादरः दृश्यते।

**भासस्य नाट्यकला**

भासः जीवनस्य विविधपक्षान् सम्यग् अवलोक्य तानि परिशील्य च रूपकेषु यथावत् रूपयति। अत एव तदीयरूपकेषु विविधता बहुमुखता च विशेषरूपेण द्रष्टुं शक्यते । कतिपयेषु नाटकेषु तदीयनाट्यकला सम्पूर्णविकसिता दृश्यते, यथा- स्वप्नवासवदत्ते, प्रतिज्ञायौगन्धरायणे च। भासस्य रूपकेषु अभिनेयता पूर्णतया विद्यते । तस्य सर्वाण्यपि रूपकाणि सारल्येन रङ्गभूमौ प्रस्तोतुं शक्यन्ते । यतो हि तस्य रूपकेषु न कुत्रापि वर्णनस्य आधिक्यं, न वा क्वचिदपि कथावस्तुनि अधिकविस्तारः दृश्यते यत् रूपकाणां अभिनेयतायां विघ्नमुत्पादयेत्। तदीयरूपकेषु पात्राणां संवादः अनावश्यकविस्तारशून्यः, व्यवस्थितः, वास्तवः, सुसङ्गतश्च । अत एव भासः संवादतत्त्वविशेषज्ञत्वने उच्यते ।

**कथावस्तुयोजनायां नैपुण्यम्**

महाभारतकथायोजनायां भासस्य रूपकेषु संविधानकस्य नवीनताद्वारा विशेषचमत्कारः दृश्यते । पञ्चरात्रस्य कथावस्तुनि -द्रोणस्य कथनानुसारं पञ्चसु रात्रिषु पाण्डवानां परिचयज्ञाने तेभ्यः राज्यार्धप्रदानम् तथा दूतघटोत्कचस्य सम्पूर्णे कथावस्तुनि कविकल्पना एव दृश्यते । कर्णभारे कविना कर्णस्य दानशीलतायाः सुन्दरं मार्मिकं च चित्रं प्रस्तुतम् । दूतवाक्ये श्रीकृष्णस्य चरित्रे महत्ता दूर्योधनस्य च चरित्रे हीनता अत्यन्तं कुशलतया कविना उपन्यस्ता अस्ति। उरुभङ्गे गदायुद्धे दुर्योधनस्य भीमात् पराजयः तथा तदीयोरुभङ्गस्य विशदं विवरणं चमत्कारपूर्णशैल्या प्रस्तुतमस्ति । भासस्य रामायणकथाश्रितेषु रूपकेषु तथा नवीनताः नैव दृश्यन्ते यथा महाभारतकथाश्रितेषु तदीयरूपकेषु नवीनता: चमत्काराधानं च दृश्यते । तथापि रामायणीयनाटकानां संवादयोजनायाम् पारदर्शिता विलोक्यते । प्रतिमानाटके देवकुलस्य कल्पना प्राचीनपरम्परामनुसरति एव । अजातशत्रोः बिम्बसारस्य च प्रतिमूर्त्तिद्वारा तत्र ऐतिहासिकतायाः निदर्शनम् उपलभ्यते । अकारणं बालिवधं प्रदर्श्य कविना कथावस्तुनि औचित्यभङ्गः विहितः ।

भासरचितरूपकात् अनुमीयते भासः कृष्णभक्तः आसीदिति । तत्र श्रीकृष्णस्य बाललीलानां सजीवचित्रणं दृश्यते । अविमारके चारुदत्ते च कविना लोककथायाः नाटकरूपेण परिवर्तनम् अतीव रुचिकरं भाति । अविमारक - कुरङ्ग्योः प्रणयचित्रणेन कविना भावुकता प्रदर्शिता । प्रतिज्ञायौगन्धरायणे स्वप्नवासवदत्ते च बृहत्कथाधारेण कथावस्तु उपन्यस्तम्। उभयोः रूपकयोः कथावस्तुनः संयोजने पौर्वापौर्ये च एतावती कुशलता आश्रिता येन तत्र कृत्रिमता न क्वचिदपि भाति ।

**चरित्रचित्रणे नैपुण्यम्**

भासस्य पात्राणि न प्रकारमात्राणि अपि तु सजीवानीव भान्ति । तेन पत्राणां व्यक्तित्वम् एवं सुस्पष्टं, स्वाभाविकम्, आदर्शरूपं च प्रदर्शितं येन दर्शकानां मनःसु निरवच्छिन्नः प्रभावः पतति । स्वप्नवासवदत्ते उदयनस्य चरित्रे उदात्तता, महनीयता, ओजस्विता च विलोक्यन्ते । वासवदत्तां प्रति तस्य प्रेम आदर्शरूपं, यतो हि वासवदत्ता मृता इति ज्ञात्वापि उदयनः तां तथैव प्रीणाति यथा जीवितां ताम् । सः स्वेच्छया द्वितीयपत्नीस्वीकारं न कृतवान् अपि तु परिस्थितिदृष्ट्या, राज्यलाभहेतोश्च । सः दर्शकात् पद्मावतीं न प्रार्थितवान् अपि तु तस्मै महाराजः स्वभगिनिकां स्वयमेव प्रादात् । तथा हि वासवदत्तया यदा प्रश्नः कृतः किं स्वयमेव तेन पद्मावती वरिता तदा धात्र्या उक्तम्- " नहि नहि । अन्यप्रयोजनेनेहागतस्य अभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता ।" एवमत्र उदयनस्य प्रेम आदर्शभूतम् इति भाति । वासवदत्तापि सर्वथैव उदयनस्य हितमेव कामयते । पद्मावत्या सह तस्या विवाहं ज्ञात्वापि सा आर्यपुत्रस्य आयुष्यं कामयते। मालागुम्फनकाले अविधवाकरणभूतस्य औषधिविशेषस्य प्रयोगविषये सा वदति – "इदं बहुशो गुम्फितव्यं मह्यं च पद्मावत्यै च ।" एवं वासवदत्ता पातिव्रतस्य परमम् आदर्शं प्रस्तौति। सा वासवदत्तायाः गोपनं कृत्वा पत्युः कल्याणाय अपूर्वस्य त्यागस्य परिचयं प्रस्तौति। पद्मवत्या सह वसन्त्या अपि तया सपत्नीद्वेषः नैव दर्शितः । एवं प्रकारेण भासः कथावस्तुविन्यासे चरित्रचित्रणे च प्रतिभामण्डितः नाट्यकारः इति नातिशयोक्तिः न वा असङ्गतम्।

# खण्डः २

**पाठरचना**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

**प्रस्तावना-**

अस्मिन् खण्डे रूपकस्य परिचयः दीयते। आलङ्कारिकानां मतं दृष्ट्वा अस्य रूपकस्य उत्पत्तिविकाशसम्बन्धितस्य तथ्यस्य चर्चा क्रियते। तत्रापि आचार्यधनञ्जयेन प्रणीतस्य दशरूपकग्रन्थस्य उल्लेखः क्रियते। तस्मिन् ग्रन्थे कथितानां दशरूपकभेदानां परिचयप्रदानेन व्यायोगस्य स्वरूपमपि छात्राणां सम्मुखे उपस्थाप्यते।

**उद्देश्यम्**

- दृश्यकाव्यपरिचयः ।
- रूपकस्य परिचयः।
- रूपकस्य उत्पत्तिविकाससम्बन्धितस्य तथ्यस्य परिचयः।
- दशरूपकभेदानां परिचयप्रदानम्।

द्रष्टुं योग्यं दृश्यम् इति व्युत्पत्या दृश् धातोः 'ऋगुपधाच्चाक्लृपिचृतेः (3.1.110) इति सूत्रेण क्यप्रत्यये विभक्त्यादिकार्ये कृते दृश्यमिति पदं निष्पद्यते। दृश्यं दर्शनीयप्रधानम्। अर्थाद् यत्काव्यं पठनश्रवणाभ्यां सहैव द्रष्टुं योग्यमपि भवति तत् काव्यं दृश्यमिति उच्यते। अस्य दृश्यकाव्यस्य अवस्थाभेदात् क्रियाभेदाद्वा अनेकानि नामानि सन्ति। यथा नाट्यं, रूपकम्, रूपमित्यादि। नट् अवस्कन्दने धातोः ण्यत्प्रत्यये णित्वादादिवृद्धौ विभक्तिकार्ये च कृते नाट्यमिति पदं निष्पद्यते। कस्यापि अनुकार्यस्य अवस्थाविशेषादेः अनुकरणं नाट्यमित्युच्यते। तथा हि धनञ्जयः दशरूपके 'अवस्थानुकृतिर्नाट्यमि 'त्याह ।

रूपयति अन्यस्य रामादेः रूपेण अन्यान् नटान् अनुकरोति इत्ति रूपकम्। यद्वा, रूपाणां रामादिस्वरूपाणाम् आरोपाद् वेषाभिनयाभ्यां तदारोपस्यानेन बोधनाद् रूपकमिति कथ्यते। किञ्च, तद्रूपकमभेदो यः उपमानोपमेययोः इति लक्षणाद् यथा मुखादौ पद्मादेः चन्द्रादेर्वा आरोपः, तथैव नटादौ यत्र अनुकार्यस्य नायकादेरारोपः तद्रूपकमिति गीयते। उक्तञ्च मन्दारमरन्दाख्ये नाट्यग्रन्थे-

**यथा मुखादौ पद्मादेरारोपो रूपकं मतम्।**

**तथैव नायकारोपो नटे रूपकमुच्यते ।।**

अत एव दशरूपके "रूपकं तत्समारोपादि 'त्युक्तम् ।। एवमेव रूप्यते - दृश्यते यत्तद्रूपमिति नाज्यस्य अपरं नाम अस्ति 'रूपं दृश्यतयोच्यते" इति दशरूपकग्रन्थस्वारस्याद्व्याख्यातम्।'

**रूपकभेदाः -**

रूपकस्य दश भेदाः भवन्ति नाटकम्, प्रकरणम्, भाणः, व्यायोगः समवकारः, डिमः, ईहामृगः, अङ्कः (उत्सृष्टाङ्कः) वीथी, प्रहसनम् इति। क्रमभेदेन धनञ्जयविरचिते दशरूपकनामके ग्रन्थे अपि रूपकस्य एते भेदाः उद्दिष्टाः सन्ति। तथा हि-

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥**

एतेषां विस्तरेण विवेचनं भवान् पठिष्यति।

**१.नाटकलक्षणम्-**

नाट्यस्य दशसु भेदेषु नाटकमन्यतमं विद्यते । नट् अवस्कन्दने धातोः ण्वुल् प्रत्ययेन निष्पन्नस्य नाटकशब्दस्य नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्तयतीत्यर्थो भवति। यद्यपि श्रव्यकाव्यमपि वैचित्र्यसमन्वितया कथया सभ्यान् रञ्जयत्येव, किन्तु रूपकं दृश्य श्रव्यो भयविधिना सामाजिकानावर्जयतीति विशेषो बोध्यः । अत्र मुख-प्रतिमुख-गर्भ- अवमर्श - उपसंहृति इति पञ्चभिः सन्धिभिः समन्वितं प्रसिद्धम् इतिवृत्तं भवति। इदमितिवृत्तं नायकस्य गुणैः विलासैः ऋद्धिभिः दयादाक्षिण्यप्रियप्राप्त्यादिभिः नानाविभूतिभिः संयुतं भवति । मध्ये मध्ये नानाविधानां सुखदुःखानां समुद्भूतिः शृङ्गारहास्यादीनां रसानां विलासश्च भवति । नाटके न्यूनातिन्यूनाः पञ्च, अधिकाधिकाः दश चाङ्काः भवन्ति। तथा चोक्तं दशरूपके- 'पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परमिति । नाटके रामायणमहाभारतादिप्रसिद्धः, राजर्षिः, दया - दाक्षिण्यादिगुणसम्पन्नः, प्रख्यातवंशः, धीरोदात्तादिलक्षणसम्पन्नः प्रतापवान्, प्रशस्तगुणसंयुक्तः, दिव्य, दिव्यादिव्यो वा नायको भवति।

नवरसरुचिरेऽपि नाटके वीरश्रृङ्गारकरुणरसेषु एक एवाङ्गीरसो भवति । अन्ये चाङ्गानि भवन्ति। मूलग्रन्थे ‘एक एव भवदेङ्गी वीरश्रृङ्गार एव वे 'ति कथनन्तु समुचितरसबोधकम् अस्ति। अर्थात् करुणादयः रसा अपि अङ्गिनो भवितुमर्हन्ति अन्यथोत्तररामचरिते करुणस्य, प्रबोधचन्द्रोदये च शान्तस्य अङ्गित्वम् अव्याहतं भवेत् । अत उक्तं ध्वनिकारेणापि-

**प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।**

**एको रसोङ्गीकर्तव्यस्तेषामुत्कर्षभिच्छता ॥**

केचित्तु श्रृङ्गार-वीर - शान्तानां मध्ये यः कश्चिदेकः एव रसो नाटके प्रधानतया निबद्धव्य इति जगदुः। येन प्रबोधचन्द्रोदयस्य नाटकत्वाक्षतावपि उत्तररामचरितस्य नाटकत्वमव्याहतं स्यादिति ध्वनिकारोक्तमेव ज्यायस्त्वम् । नाटकस्यान्ते निर्वहणसन्धौ अद्भुतरसस्य समावेशो भवति। तथा चोक्तं नाट्यशास्त्रेऽपि-

**सर्वेषां काव्यानां नानारसभावयुक्तियुक्तानाम्।**

**निर्वहणे कर्तव्यो नित्यं हि रसोऽद्भुतस्तज्ज्ञैः ॥**

नाटके नायककर्मणि संलग्नाः चत्वारः पञ्च वा मुख्याः पुरुषाः भवन्ति । नाटकस्य रचना गोपुच्छसदृशं भवति । तथा चोक्तं भरतेनापि - 'कार्यं गोपुच्छाग्रं कर्तव्यं बन्धमासाद्य । ' किन्तु 'गोपुच्छाग्रमि 'ति पदमङ्गीकृत्य टीकाकारेषु विप्रतिपत्तयः सन्ति । तथाहि-

1. नाटके क्रमेण उत्तरोत्तरमङ्काः लघवः स्युरिति केचित् ।

2. यथा गोपुच्छे केचिद् बाला: लघवः केचिद्दीर्घाश्च भवन्ति तथैव नाटके केचिदङ्काः ह्रस्वाः केचिच्च दीर्घाः कर्तव्याः इत्यन्ये ब्रुवते । एवं नाटके कानिचन कार्याणि मुखसन्धौ कानिचन प्रतिमुखसन्धौ, कानिचन च ततोऽग्रे समाप्यानि भवन्ति । वस्तुतस्तु गोः पुच्छस्य अग्रभागे द्वित्राः बाला, अग्रे ततोऽधिकाः भवन्ति । तथैव नाटके आदौ कथावस्तु लघ्वाकारेण आरभ्यते, अग्रे च बृहदाकारेण वर्ण्यते।

एवं नाटके अवस्था-अर्थप्रकृति - सन्धिप्रभृतीनां सर्वेषां नाट्यतत्त्वानां समावेशो भवति । नाटकस्य कथावस्तुनि रसविरुद्धमनुचितं च कथावस्तु अन्यथा प्रकल्पयेत्, अथवा तत् परित्यजेद्वेति दशरूपके लिखितमस्ति-

**यत्तस्यानुचितं किञ्चिन्नायकस्य रसस्य वा ।**

**विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥**

यथा छद्मना बालिवधो मायुराजेनोदात्तराघवे परित्यक्तः । वीरचरिते च रावणसौहार्देन बाली रामवधार्थमागतः रामेण हत इत्यन्यथा कृतः । अङ्कप्रभृतीनां निरूपणमग्रिमे पाठे अवलोकनीयम्।

**२.प्रकरणस्वरूपम्-**

रूपकभेदेषु प्रकरणम् अन्यतमं वर्तते । प्रकर्षेण क्रियते कल्प्यते नेता फलं वस्तुव्यस्त-समस्ततया अत्रेति प्रकरणम् । अत्र वर्णनीयं नायकसम्बन्धीतिवृत्तं लौकिकं कविकल्पितं वा भवति । तथा चोक्तं महर्षिणा-

**यत्र कविरात्मबुद्ध्या वस्तु शरीरं नायकञ्चैव ।**

**औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधैर्ज्ञेयम् ॥**

अर्थाद् यत्र नाट्ये कविः आत्मबुद्ध्या = स्वकल्पनया वस्तुशरीरं नायकं = नाट्यपात्राणि च औत्पत्तिकं = उत्पत्यासम्बद्धं, कृत्रिम वा प्रकुरुते = करोति, न तु पुराणेतिहासरामायणप्रसिद्धं नायकं करोति तद् बुधैः नाट्यतत्त्वविद्भिः प्रकरणमिति ज्ञेयम् ।

अत्र शृङ्गाररसोऽङ्गी भवति । अन्ये रसाश्चाङ्गानि भवन्ति । नायकः च ब्राह्मणः, आमात्यः, वणिग्वा भवति । स हि नायक : सापायाः विघ्नसहिताः ये धर्मार्थकामाः तेषु आसक्तो मुक्तावनासक्तश्च भवति । अतएव धर्मार्थकामानां विशेषणत्वेन सापाय इत्युक्तिः । चतुर्विधेषु धीरोदात्तादि नायकेषु अत्र धीरप्रशान्तको नायको भवति । यो हि धर्मं स्वर्गसाध नत्वेन, कामं पुत्रपश्वादिविषयकत्वेन, अर्थञ्च भोगसाधनत्वेनाङ्गीकरोति । तथा चोक्तम् सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् । तत्र आदौ विप्रनायकस्योदाहरणं मृच्छकटिकम्, अमात्यनायकस्य मालतीमाधवम्, वणिङ्नायकस्य चोदाहरणं पुष्पभूषितमित्यवधेयम्। स्त्रीपात्रानुसारेणापि प्रकरणभेदो वर्तते । अत्र नायिका क्वचित् कुलजा ( कुलस्त्री) क्वचित् वेश्या, क्वचित् च उभयात्मिका भवति । तत्र कुलस्त्रीनायिकं प्रकरणं शुद्धं, वेश्यानायिक धूर्तम्, उभयनायिकञ्च मिश्रमित्युच्यते । मिश्रं प्रकरणं कितवधूर्तसकारविटचेटैः संकुलं भवति। तत्र क्रमेण एतेषां पुष्पभूषितम्, रङ्गवृत्तम्, मृच्छकटिकञ्चोदाहरणानि । उक्तञ्च काव्येन्दुप्रकाशे-

**शुद्धं धूर्तमिश्रञ्च भेदात्तत्त्रिविधं पुनः ।**

**कुलस्त्रीनायिकं शुद्धं गणिकानायिकं परम् ॥**

**प्राधान्यमुभयोर्यत्र मिश्रं प्रकरणं विदुः ॥**

तत्र कुलस्त्री संस्कृतेन, वेश्या च प्राकृतेन भाषादिकं व्यवहरति । तथा चोक्तं मन्दारमन्दे- तत्र वेश्या प्राकृतं तु कुलजा संस्कृतं वदेत् ॥ इति । अन्यत्सर्वं नाटकवन्मन्तव्यम्। तथा चोक्तम्- विना विशेषं सर्वेषां लक्ष्म

नाटकवन्मतम् इति। साहित्यदर्पणस्य लक्ष्मीटीकायां प्रकरणलक्षणस्य परिष्कारः एवमस्ति - 'कविकल्पितलौकिकवृत्तान्तजन्यत्वे सति विनाशशालि धर्मार्थकामतत्परः धीरप्रशान्तक-विप्रामात्यवणिगान्यतमनायकवच्छृङ्गाररसप्रधानदृश्यकाव्यत्वं प्रकरणमिति प्रकरणस्य सामान्यलक्षणम् । प्रकरणस्य स्वरूपं रेखाचित्रेण एवं बोध्यम्-

### ३.भाणस्वरूपम्

भाणनामके रूपकभेदे धूर्तस्य नायकस्य नानावस्थात्मकं चरितं वर्णितं भवति । अत्र एक एव अङ्कः, एक एव च अतीवकुशलः पण्डितो विटो वा नायकः भवति । यो हि एकाकी एव आकाशभाषितं करोति । अतः एव अस्य भाण इत्यन्वर्थ संज्ञा अस्ति । भण्यते व्योमोक्त्या नायकेन स्वपरवृत्तं प्रकाश्यते इति भाणः । अस्य नायकः स्वानुभूतम् इतरेणानुभूतं वा वृत्तं केनापि प्रकारेण बुद्धवा नाट्यशलायाम् आकाशभाषितैः सम्बोधनेन वा उक्तिं प्रत्युक्तिं प्रकरोति । शौर्यसौभाग्यवर्णनैः अर्थात् शौर्यस्य पराक्रमस्य, सौभाग्यस्य माङ्गलिककार्यस्य वर्णनैः, वीर - श्रृङ्गाररसौ सूचयति । अनेन प्रकारेण शौर्यवर्णनैः वीररसं, दम्पत्योः सौभाग्यवर्णनैश्च श्रृङ्गारं सूचयति । अत्र भाणरूपके इतिवृत्तं प्रायेण उत्पाद्यमेव भवति। सात्वती-आरभटीकैशिकीप्रभृतयः वृत्तयः क्वचित्क्वचित्प्रयुज्यन्ते । प्राचुर्येण तु भारतीवृत्तिरेव प्रयुक्ता भवति । केवलं मुखसन्धेः निर्वहणसन्धेश्च प्रयोगो भवति । अत्र गे यपद-स्थितपाठ्य- आसीन - पुष्पगण्डिका - प्रच्छेदक - त्रिगूढक - सैन्ध व-द्विगूढक-उत्तमोत्तमक-उक्तप्रत्युक्तकेति दश लास्याङ्गानि भवन्ति । शेषं सर्वं कृत्यं नाटकवदेव विज्ञेयम्। लीलामधुकरनामकं पुस्तकं भाणरूपकस्योदाहरणम्।

### ४. व्यायोगस्वरूपम् –

व्यायोगनामके रूपके पुराणेतिहासादिषु प्रसिद्धमितिवृत्तं भवति। विशेषेण आसमन्ताद् युज्यन्ते काव्यार्थं समारभन्ते अनेके पुरुषाः यत्रासौ व्यायोगः । अस्मिन् स्त्रीपात्राणामल्पता पुरुषपात्राणाञ्च बहुलता भवति । अयमेकाङ्को भवति । गर्भविमर्शसन्धिवर्जं मुख-प्रतिमुख–उपसंहृतीति त्रयः सन्धयः भवन्ति। स्त्रीनिमित्तमत्र युद्धं वर्जितं भवति। यथा परसुरामेण पितृवधकोपात् सहस्रार्जुनस्य वधः कृतः । कैशिकीं वृतिं वर्जयित्वा प्रायेण अन्याः सर्वाः वृत्तयः भवन्ति। नायकः दिव्यादिव्यो वा प्रसिद्धः धीरोद्धातो भवति । हास्य - शृङ्गार - शान्तरसानपहाय अन्यः कश्चिदपि रसो अङ्गी भवितुमर्हति । उदाहरणञ्चास्यै मध्यमव्यायोगः महाकविश्रीभासविरचितः अस्ति ।

**५.समवकारस्वरूपम्-**

समवकीर्यते कविभिर्निबध्यते इति समवकारः । सम् पूर्वकात् करोतेः 'अकर्तरि च कारके संज्ञायाम्' सूत्रेण घञ् प्रत्यये समवकारशब्दो निष्पद्यते । अयं रूपकभेदेषु अन्यतमः। लक्ष्मीटीकायामस्यार्थोऽस्ति - " यत्र सङ्गतैः अवकीर्णैश्चार्थैः त्रिवर्गोपायैः पूर्वसिद्धैरेव क्रियते निबध्यते स समवकारः" इति । समवकारे देवासुरयोः आश्रितम् इतिहासपुराणादिषु प्रसिद्धम् इतिवृत्तं वर्णितं भवति। अत्र विमर्शसन्धिं विहाय प्रायेण अन्ये मुख- प्रतिमुख-गर्भ - अवमर्शाख्याः चत्वारः सन्धयो भवन्ति, त्रयः अङ्काश्च भवन्ति । प्रथमाङ्के मुखप्रतिमुखसन्धी भवतः । द्वितीयतृतीयाङ्कयोः प्रख्याताः दिव्यादिव्याः धीरोदात्ता: द्वादशनायकाः भवन्ति। येषां फलं पृथक् पृथग् भवति। यथा समुद्रमन्थनाख्ये समवकारे शिव-विष्णु-इन्द्रादीनां नायकानां विषपान-लक्ष्मीप्राप्ति- ऐरावत - लाभादीनि फलानि । प्रायेण वीररसप्रधानाः सर्वेऽपि रसाः, स्वल्पकैशिकीसहिताः सर्वाः भारत्यादयः वृत्तयः, उद्घात्यक- अवलगित-प्र त्रिगत-छल-वाक्केलि-अधिबल - गण्ड-अवस्यन्दित - नालिका -असत्प्रलाप - व्याहार मृदवाख्यानि त्रयोदश वीथ्यङ्गानि, षडक्षरा गायत्री - सप्ताक्षरा चोष्णिक् - सहितानि अनेकानि छन्दांसि, धर्म-अर्थकामात्मकः त्रिशृङ्गारः, स्वाभाविक - प्राकृतिक - कृत्रिमात्मक: त्रिकपटः, चेतन-अचेतन-चेतनाचेतनात्मकः

कौतुकप्रतरणादिविशेषः त्रिवद्रवः च निबद्धाः भवन्ति। प्रथमाङ्कीया कथावस्तु द्वादशनालिकाभिः (चतुर्विंशतिघटिकाभिः) द्वितीयाङ्कीया तृसृभिः घटिकाभिः, तृतीयाङ्कीयं च कथावस्तु द्वाभ्यां घटिकाभ्यां प्रदर्शनीयं भवति । शेषं कृत्यमत्र नाटकवदेव भवति। तथा चोक्तम्– 'विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतमिति । किन्तु विन्दुप्रवेशको अत्र न भवतः इति नाटकादस्य विशेषोऽवगन्तव्यः ।

**६.डिमस्वरूपम् -**

डिमः सङ्घातः, इति नायकानां सङ्घातात्मकत्वात् नायकानां समूहः संप्लवो वा डिम इत्युच्यते। तद्योगादिदं रूपकमपि डिम इति प्रसिद्धम् । अत्र इतिवृत्तमैतिहासिकं भवति। माया इन्द्रजाल-सङ्ग्राम-क्रोध- उन्मत्तादीनां चेष्टया सूर्यचन्द्रमसोः ग्रहणात्मकैः इतिवृत्तैः व्याप्तं रूपकं डिम इति कथ्यते । अत्र रौद्ररसोऽङ्गी भवति । अन्ये सर्वे रसाः अङ्गानि भवन्ति। अङ्काश्चत्वारः, अत्र विष्कम्भकप्रवेशकयोः अभावः भवति । देव- गन्धर्व-यक्ष-राक्षसमहोरग-भूतप्रेत-पिशाचप्रभृतयः अत्यन्तमुद्धताः षोडशसंख्याकाः नायकाः भवन्ति । कैशिकीवर्जम् अन्याः भारत्यादयः वृत्तयः, शान्त - हास्य - श्रृङ्गारवर्जमन्ये दीप्ताः षड् रसाः वीरबीभत्सादयः अत्र भवन्ति। त्रिपरदाहाख्यं रूपकमस्योदाहरणम् । दीप्तरसेष्वपि प्रायेण रौद्ररसोऽङ्गी भवति । अन्ये भवन्ति चाङ्गानि भवन्ति ।

**७.ईहामृगस्वरूपम् -**

मृगवदलभ्यां नायिकामत्र नायक : ईहते इति ईहामृगः । ईहामृगशब्दः पृषोदरादित्वात् साधीयः। अस्मिन् रूपके ख्याताख्यातरूपम् ऐतिहासिकं कल्पितं वृत्तं वा इतिवृत्तं चतुर्षु अङ्केषु वर्णितं भवति। अत्र मुख - प्रतिमुखनिर्वहणाख्याः त्रयः सन्धयो भवन्ति । अत्र नायकप्रतिनायकौ प्रसिद्धौ धीरोद्धतौ नरौ देवौ वा भवतः । यद्वा, नरो नायकः दिव्यश्च प्रतिनायकः, अथवा, नरः प्रतिनायकः दिव्यश्च, नायकोऽत्र भवतीति भावः । तयोः आद्यः धीरः अन्त्यः उद्धतः मूढस्वभावात् च अयुक्तकार्यकारी भवति । अत्र

क्वचित् क्वचित् स्वस्य रमणमनिच्छन्तीं दिव्यां स्त्रियम्प्रति बलात्कारेण छलेन च सुरतं कामयमानस्य प्रतिनायकस्य दुश्चेष्टामपि कविः शृङ्गाराभासरूपेण प्रदर्शयति । अत्र स्वर्ग्याः मर्त्याः वा उद्धतस्वभावाः दशसंख्याकाः पताकानायका अपि भवन्ति । एवं नायकौ द्वौ, पताकानायकाश्च दश इति आहत्य द्वादशनायकाः भवन्ति। अत्र क्रुद्धाः नायकाः युद्धायोद्यता अपि कार्यान्तरच्छलेन युद्धात् निवर्तन्ते। अत्र 'आततायी वधार्हणः' इत्युक्त्या वधयोग्या अपि महात्मानः वधानर्हत्वात् वध्याः दण्ड्याः वा न भवन्ति। अत्र एक एवाङ्कः, देव एव नायकः इति कस्यचिन्मतम् । केचन च षड्नायकम् ईहामृगं स्वीकुर्वन्ति । केचन दिव्यस्त्रीहेतुकमत्र युद्धं भवतीत्यपि वदन्ति। अस्य रूपकस्योदाहरणमस्ति- कुसुमशेखरविजयम्।

**८.अङ्कस्वरूपम्-**

अङ्काः नाटकेष्वपि भवन्ति । तेभ्यः नाटकीय- अङ्केभ्यः पार्थक्यं प्रदर्शयितुमुत्सृष्टाङ्क इति नामान्तरमस्ति । अत्र सृष्टिः विपरीता भवतीति उत्क्रान्त इति नामेत्यप्याहुः । तथा चोक्तं मूले 'इमं च केचित् नाटकाद्यन्तः पात्यङ्कपरिच्छेदार्थमुत्सृकाङ्कनामानम् आहुः । अन्ये तु उत्क्रान्ता = विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकाङ्कः इति निगदन्ति । अत्र एक एवाको भवति, प्राकृतः सामान्यो जनो नायको भवति। करुणरसोऽत्राङ्गी भवति । स्त्रीविलापोऽत्राधिक्येन प्रदर्श्यते। कथेतिहाससिद्धा भवति । यां कविः स्वप्रतिभया विस्तारयति । सन्धि-वृत्ति - अङ्गानि च भाणवदेव भवन्ति । एवमेव जयपराजयौ, वाक्कलहः निर्वेदवचनानि चाधिक्येन वर्णितानि भवन्ति।

# खण्डः ३

**पाठरचना**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

**प्रस्तावना**

अस्मिन् खण्डे दृश्यकाव्यस्य लक्षणम्, तेषां भेदादिविषयाः वर्णिताः। तत्र मध्यमव्यायोगस्य कथावस्तुम् आदौ उपक्रमेण छात्राणां सम्मुखे स्थाप्यते। एवञ्च मध्यमव्यायोगे वर्णितकथावस्तुनः विशेषतः प्रथमभागः पाठ्यते। तत्रापि केशवदाशस्य ब्राह्मणस्य मध्यमपुत्रस्य दुर्दशा नाट्यकारेण यथा वर्णिता तद् ग्रन्थाधारेण छात्राणां सम्मुखे उपसस्थाप्यते।

**उद्देश्यम्**

- सरलया रीत्या छात्राणां दृश्यकाव्यमाध्यमेन संस्कृतभाषाज्ञानं जायते।

- व्यायोगमाध्यमेन रसालङ्कारादीनां प्रमुखविषयानां विचारः क्रियते।
- नीतिशास्त्रस्य ज्ञानं व्यायोगमाध्यमेन छात्रैः ज्ञातुं शक्यते।
- महाभारते वर्णितहिडिम्बा कथायाः ज्ञानं छात्राणां जायते।
- सामाजिकचिन्तनस्य विचारः व्यायोगमाध्यमेन छात्रैः प्राप्यन्ते।

**महाकविभासविरचितः**

**मध्यमव्यायोगः**

**एकाङ्कः**

( नान्द्यन्ते ततः प्रविशति सूत्रधारः । )

**पायात् स वोऽसुरवधूहृदयावसादः**

**पादो हरेः कुवलयामलखङ्गनीलः ।**

**यः प्रोद्यतस्त्रिभुवनक्रमणे रराज**

**वैदूर्यसंक्रम इवाम्बरसागरस्य ॥ १॥**

---

रत्नाकर कुलोत्पन्ना पद्माकरनिवासिनी ।

श्रियं ददातु वो लक्ष्मीः कमला श्रीहरिप्रिया ।।

**शब्दार्थः** - नान्दी = स्तुति रूपमंगल गीतं । अन्ते = समाप्तौ । ततः = नेपथ्य स्थानात् । प्रविशति = प्रवेशं करोति । सूत्रधारः = नाट्यप्रयोक्ता, नाट्यकलाकुशलः ।

**व्याख्या**- तत्रभवान् हासरसोत्पादकः महाकविभासः लोकानुरञ्जनाय 'मध्यमव्यायोग' नामकं रूपकं प्रारब्धुमिच्छुर्माङ्गलिकभूमिकामवतारयति

**अन्वयः**- हरेः, सः, पादः, वः (युष्मान्), पायात्। यः, असुरवधूहृदया- वसादः, कुवलयामलखङ्गनीलः त्रिभुवनक्रमणे प्रोद्यतः अम्वरसागरस्य वैदूर्य- संक्रम इव, रराज ॥ १ ॥

**शब्दार्थः**- हरेः = वामनरूपधारी विष्णोः, पादः- चरणम्, वः = युस्मान्, पायात्- रक्षतु, यः = तस्य (चरणम्), असुरवधूहृदयावसादः - असुर-पत्निसमूहानां हृदये विषादमुत्पादनकारी, कुवलयामलखङ्गनीलः = नीलकमलं तथा स्वच्छखङ्ग इव भांति श्यामवर्णयुक्तः, त्रिभुवनक्रमणे = भुवनत्रयस्य उत्थाने(प्रयत्नशील); अम्बरसागरस्य आकाशरूपीसागरस्य वैदूर्यसंक्रमः - वैदूर्य = इन्द्रनीलमणिना रचितः सेतुवेशेषः, इव = सदृश, तुल्य; रराज = शोभते स्म ।

**व्याख्या** -हरेः = वामनवेशधारिणः अथवा वामनरूपिणः वामनाव- तारस्य वा विष्णोः भगवतः, सः लोकप्रसिद्धः, पादः श्यामचरणः, वः = युष्मान्, महानुभावान्, सहृदयजनान्, सामाजिकान् अर्थात् प्रस्तुतनाटक- प्रेक्षकानित्यर्थः । पायात् = रक्षेत् । 'पा' रक्षणे धातोः विधिलिङि प्रथमपुरुषैकणचने पायादिति रूपं भवति । असुरवधूहृदयावसादः = बलि पत्नी- हृदयविषादः, असुरस्त्रीहृदयशोकोत्पादकः, कुवलयामलखड्ङ्गनीलः = नीलकमलवत् तथा स्वच्छकृपाण इव श्यामः = श्यामलः, श्यामवर्णः; लोकभाषायां 'साँवरा' इति प्रसिद्धः । त्रिभुवनक्रमणे = त्रिलोकसंक्रमणे पादाभ्यां मापणे इत्यर्थः, प्रोद्यतः = प्रोत्थितः, अति तत्परः । अम्बरसागरस्य आकाशसमुद्रस्य, बैदूर्यसंक्रम = वैदूर्य = इन्द्रनीलमणिरचितसंक्रमः = दुर्गसंचर; 'संक्रमो दुर्ग- संञ्चर' इति अमरकोशे, 'लक्षणया सेतु' इति भावः । इवः सदृशः, तुल्यः रराज = शुशुभे । 'राज' दीप्तौ धातोः परोक्षे लिटि प्रथमपुरुषैकवचने 'रराज' रूपं भवति, वर्तमानकाले प्रथमपुरुष एकवचने 'राजते' इति रूपं भवति । 'क्रमु' पादविच्चेपे धातोः युप्रत्ययेन क्रमणं रूपं भवति ।

**समासः**- असुरवधूहृदयावसादः - असुरस्य = बलिनृपतेः वधूनां = स्त्रीणां हृदयेषु = चित्तेषु अवसादकः = विषादोत्पादकः स असुरवधूहृदयावसादः । अथवा सामान्यतः असुरवधूनां दैत्यवधूनां हृदयेषु = शोकोत्पादकः । अव- सादयति = पीडयति इति अवसादः । कुवलया मलखङ्गनीलः- कुवलयवत् =

नीलकमलवत् (इव) तथैव अमलो यः खड्गः = कृपाणः तद्वत् (इव) नीलौ श्यामलौ पादौ यस्य स अथवा तद्वत् नीलः श्यामवर्णः यः पादः स तथोक्तः । त्रिभुवनक्रमणे - त्रयाणां भुवनानां समाहारः त्रिभुवनम् तस्य तेषां वा क्रमणं = पादविक्षेपणं तस्मिन् क्रमणे = मापणे इति त्रिभुवने । प्रोद्यतः- प्रकर्षेण उद्यतः उत्थितः इति प्रोद्यतः । अम्बरसागरस्य- अम्बरमेव सागरः इति अम्बरसागरः, 'मयूरव्यंसकादयश्च' (पा० २।१।७२) इति मयूरव्यंसकादित्वात् समासः, तस्य अम्बरसागरस्य । वैदूर्यसंक्रमः - 'विदूर' नामकपर्वतात् जातः = उत्पन्न वैदूर्यः तस्य संक्रमः दुर्ग इति वैदूर्यसंक्रमः ।

---

एवमार्यमिश्रान् विज्ञापयामि । अये किंनु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि

(नेपथ्ये)

भोस्तात ! कोनु खल्वेषः ?

सूत्रधारः - भवतु, विज्ञातम् ।

**भोः शब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः । त्रास्यते निर्विशङ्केन केनचित् पापचेतसा ॥ २ ॥**

---

**शब्दार्थः**- एवम् = एतादृशम्, आर्यमिश्रान् = पूज्यश्राष्ठान्, । विज्ञापयामि = निवेदयामि किन्नु- खलु = किम् इत्यर्थः, मयि = मत्कृते, विज्ञापनव्यग्रे = विज्ञापनप्रदाने व्यग्रः, शब्द इव -ध्वनि इव; श्रूयते = श्रुतिगोचरो भवति। । पश्यामि = दृश्यते ।

**व्याख्या** - एवं = मम सूत्रधारस्य बुद्धिस्थितेन वच्यमाणेन नाट्येन वा प्रकारेण; आयंमिश्रान्- आर्यान् मान्यान्, पूज्यान्, मिश्रान् विविध- शास्त्राभिज्ञान् सुख्यान् अथवा कुलशीलादि आर्यजनगुणसम्पन्नान्, श्रेष्ठान् सामाजिकान् सहृदयानित्यर्थः । अये ! अहो ! अरे ! आश्चर्यबोधकमव्यय- मिदम् । किन्नु खलु = किं नामेदं, किं कारणं था, 'प्रश्न, वितर्क, क्या' इति वाचकं 'किन्नु' इति अव्ययम् । 'खलु' शब्दः वाक्यालंकारे प्रयुक्तः, क्वचित् प्रश्ने निश्चये निषेधेऽपि आगच्छति। मयि सूत्रधारे; विज्ञापनव्यग्रे = विज्ञा- पनोन्मुखे,

व्यस्ते वा, शब्द् इव कुतश्चिदपि, कोऽपि अनिश्चितध्वनिरिव । श्रूयते = आकर्ण्यते, कर्णगोचरी क्रियते । अङ्ग ! भो ! सम्बोधनमव्ययमिदम् । पश्यामि = जानामि; 'दृश' धातोः ज्ञानार्थे प्रयुक्तत्वादयमर्थो आयाति, निश्चिनोमि इत्यर्थः ।

**समासः** - आर्यमिश्रान्- आर्येषु मिश्राः इति आर्यमिश्राः (सप्तमी तत्पुरुष) तान् आर्यमिश्रान् । विज्ञापनव्यग्रे- विज्ञापने विज्ञापनाय वा व्यग्रः इति विज्ञापनव्यग्रः (सप्तमी त० या चतुर्थी त० स०) तस्मिन् विज्ञापनव्यये ।

**शब्दार्थः** - नेपथ्ये = दूरस्थे, नाटकीयपात्राणां तद्वेषभूमिका ग्रहणसाधनं स्थानं नेपथ्यमुच्यते ।

**अन्वयः**- अस्य, 'भो' शब्दोच्चारणात्, अयं ब्राह्मणः (अस्ति, इत्यस्मिन्), न, संशयः । केनचित् निर्विशङ्केन, पापचेतसा, त्रास्यते ॥ २ ॥

**शब्दार्थः** - अस्य = एतस्य, समीपवर्तीव्यक्तेः, 'भो' शब्दोच्चारणयोग्यः सम्बोधने =, अयं व्यक्तिविशेषः सः, संशयः- सन्देहः, न- नहि इत्यर्थः। केनचित् - केनापि, निर्विशहेन = निःशंकयुक्तेन, पापचेतसा = पापबुद्ध्या,त्रास्यते = भाययति।

---

**व्याख्या** - अस्य = पाश्ववर्तीजनस्य; 'भो' शब्दोच्चारणात् = 'भो' इति सम्बोधन वाचक पदोच्चारणात्, अत्र 'हेतौ' सूत्रेण पंचमी वर्तते । अयं = समीपस्थः, परन्तु दृष्टिगोचरः नास्ति; ब्राह्मणः विप्रकुलोत्पन्नः (अस्मिन्), संशयः = सन्देह, न = नास्ति । केनचित् अज्ञातकुलशीलेन व्यक्तिविशेषेण, निर्विशक्तेन = शङ्कारहितेन, पापचेतसा = पापमनसा, त्रास्यते = त्रासं उत्पाद्यते ।

**समासः** - शब्दोच्चारणात् शब्दस्य उच्चारणं शब्दोच्चारणं (१० त०), तस्मात् शब्दोच्चारणात् । निर्विशङ्केन - निर्गता विशेषेण शङ्का यस्मात् स निर्विशङ्कः (बहुब्रीहिसमासः), तेन तथोक्तेन । पापचेतसा - पापं पापपूर्ण चेतो (मनो) यस्य (बहु० स०) तेन पापचेतसा । त्रास धातोः कर्मवाच्ये लटि त्रास्यते इति रूपं भवति ।

---

( पुनर्नेपथ्ये )

भोस्तात ! कोनु खल्वेषः ?

सूत्रधारः- हन्त, दृढं विज्ञातम् । एष खलु पाण्डवमध्यमस्यात्मजो हिडिम्बाराणसंभूतो राक्षसाग्निरकृतवैरं ब्राह्मणजनं वित्रासयति । भोः कष्टम् । अत्र हि–

**भ्रान्तैः सुतैः परिवृतस्तरुणैः सदारो वृद्धो द्विजो निशिचरानुचरः स एषः ।**

**व्याघ्रानुसारचकितो वृषभः सधेनुः सन्त्रस्तवत्सक इवाकुलतामुपैति ॥ ३ ॥**

(निष्क्रान्तः ।)

---

**शब्दार्थः** - पाण्डवमध्यमस्य = पाण्डवेषु मध्यमस्य भीमसेनस्य, आत्मजः = पुत्रः, हिडिम्बारणिसम्भूतः = हिडिम्बारूपी अरणितः उत्पन्न, राक्षसाग्निः = राक्षसरूपी अग्निः, अकृतवैरं- अजातशत्रुः, निर्वैरी, ब्राह्मणजनं = विप्रजनं, वित्रासयति = विशेषरूपेण भाययति इति।

**व्याख्या**- 'हन्त' इति प्रसन्नतासूचकमव्ययम् । पाण्डवमध्यमस्य = पाण्डवभीमसेनस्य, आत्मजः पुत्रः, हिडिम्बारणिसम्भूतः हिडिम्बारूपिणी अरणिकाष्ठजातः, राक्षसाग्निः अग्निस्वरूपराक्षसः, अकृतधैरं अजातवैरं, शत्रुभाववर्जितं, साधुस्वभावं वा; ब्राह्मणजनं विप्रजनं, वित्रासयति = भय- मुत्पादयति, कष्टं ददाति इत्यर्थः ।

**समासः** - पाण्डवमध्यमस्य - पाण्डवेषु मध्यमः (स० तत्पुरुष) पाण्डवमध्यमः, तस्य पाण्डवमध्यमस्य । आत्मजः- आत्मना जायते इति आत्मजः । हिडिम्बारणि सम्भूतः - हिडिम्बा एव अरणिः (= शमीकाष्ठविशेषः), हिडिम्बा- रणिः तत्र (तस्याः) सम्भूतः उत्पन्न इति हिडिम्बारणिसम्भूतः, 'मयूरव्यंस- कादयश्च' (२।१।७२) इति पाणिनिसूत्रेण समासः । राक्षसाग्निः - राक्षस एव अग्निः राक्षसाग्निः । अकृतवैरं - न कृतः अकृतः, अकृतं वैरं येन स अकृतवैरः (बहु ० समास) तं अकृतवैरम् । ब्राह्मणजनः- ब्राह्मणश्चासौ जनश्च इति ब्राह्मणजनः (कर्मधारय समास) तं तथोक्तम् । वित्रासयति-विशेषेण त्रासयति इति वित्रासयति ।

**अन्वयः**- तरुणैः, भ्रान्तैः, सुतैः, परिवृतः, सदारः, निशिचरानुचरः, एषः, स, वृद्धः, द्विजः, सन्त्रस्तवत्सकः, सधेनुः, व्याघ्रानुसारचकितः, वृषभ इव, आकुलताम्, उपैति ॥ ३ ॥

**शब्दार्थः** - तरुणैः = युभिः, भ्रान्तैः = संदेहैः, पुत्रैः = सुतैः, परिवृतः = समादृतः, सदारः- पत्नी सहितम्, निशिचरानुचरः = राक्षसः पृष्टगामिनः, एषः = अयम्, , वृद्धः = ज्ञानशीलः, द्विजः- ब्राह्मणः, सन्त्रस्तवत्सकः- भयभीतयुक्तबालकः, सधेनुः-धेनुसहितम्, व्याघ्रानु- सारचकितः = व्याघ्रेणाक्रमितः चकितश्च, आकुलताम् = व्याकुलताम्, उपैति-प्राप्नोति।

**व्याख्या** - तरुणैः = युवावस्थापन्नैः, युवकैः, आन्तैः = भ्रमितैः, क्वचित् 'श्रान्तैः' इति पाठात् "थकितैः' इत्यर्थः, सुतैः पुत्रैः, परिवृतः परिवेष्टितः, सदारः = सपत्नीकः, 'पत्नी भार्या जाया दाराः स्यात्' इत्यमरः । निशिचरा- नुचरः = राक्षसाक्रान्तः, एष सः अयं सः, वृद्धः वृद्धावस्थाप्राप्तः, द्विजः = विप्रः, सन्त्रस्तवत्सकः अति भीत लघु वत्सः, 'शकृत् करिस्तु वत्सः' इत्यमरः । सधेनुः = धेनुसहितः, 'धेनुः स्यान्नवसूतिका' - इत्यमरः । व्याघ्रानुसार- चकितः = व्याघ्राक्रमणचकितः, भीत इत्यर्थः, वृषभ इव वलीवर्द इव, 'उक्षा भद्रो वलीवर्द ऋषभो वृषभो वृषः' - इत्यमरः । आकुलताम् = व्याकुलताम्, उपैति = प्राप्नोति, अनुभवति ।

**समासः**- सदारः - दारैः सह (तृ० स०) सदारः । निशिचरानुचरः- अनु = पश्चात् चरति इति अनुचरः, निशि = रात्रौ चरतीति निशिचरः तेन निशिचरेण अनुचरः (= अनुधावितः) इति निशिचरानुचरः । सन्त्रस्तवत्सकः- सम्यक् प्रकारेण त्रस्तः सन्त्रस्तः, सन्त्रस्तः वत्सको यस्य (बहु० स०) स सन्त्रस्तवत्सकः । 'वत्सकः' इत्यत्र स्वार्थे 'क' प्रत्ययो वर्तते अथवा क्षुद्रार्थे लघ्वर्थे वा 'क' प्रत्ययः । अतः 'वत्सकः' इत्यस्य 'लघुवत्सः', हिन्दी भाषायां 'छोटा बच्छा' इत्यर्थो भवति । सधेनुः- धेन्वा सहितः (यः) सधेनुः (तृ० स० ) । व्याघ्रानुसारचकितः- व्याघ्रस्य अनुसारः व्याघ्रानुसारः, तेन व्याघ्रानु सारेण चकितः इति व्याघ्रानुसारचकितः ।

---

(ततः प्रविशति सुतत्रयकलत्रपरिवृतो ब्राह्मणः पृष्ठतो घटोत्कचश्च । )

ब्राह्मणः - भोः कोनु खल्वेषः ?

**तरुणरविकरप्रकीर्णकेशो भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः । सतडिदिव घनः सकण्ठसूत्रो युगनिधनै प्रतिमाकृतिर्हरस्य ॥ ४॥**

---

**अन्वयः** - तरुणरविकर प्रकीर्णकेशः, भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः, सकण्ठ- सूत्रः, सतडित्, घन इव, युगनिधने, हरस्य, प्रतिमाकृतिः (अयं राक्षसः अस्ति) ॥ ४ ॥

**शब्दार्थः** – तरुण- बालः, रविकर- सूर्यकिरणः, प्रकीर्णकेशः- विस्तारिताः केशाः, भ्रुकुटि-कुञ्चनदृष्टिः, पुटोज्ज्वलः- उज्वलः, पिङ्गलायताच्क्षः- क्रोधयुक्तनयनयुगलम्, सकण्ठसूत्रः- कण्ठसूत्रसहितम्, सतडित् = विद्युत्, युगनिधने = युगस्यपरिसमाप्तेः, हरस्य - शिवस्य, (संहारकर्ताशिवस्य), प्रतिमाकृतिः- शरीराकृतिः।

**व्याख्या-** तरुणरविकर प्रकीर्णकेशः- नवोदितसूर्यकिरणविस्तृतोन्नतबालः, झुकु टिपुटोज्ज्वलपिङ्गलायताक्षः = क्रोधेन भ्रूभङ्गपुटयोः उज्वलं प्रदीप्तं, पिङ्गलं = कपिलवर्ण इषद्रक्तपीतमिश्रणम्, 'भूरा वर्ण' इति भाषायां, 'कडारः कपिलः पिङ्गविशङ्गौ कडुपिङ्गलौ' इत्यमरः । आयतं विशालं, अत्ति = नयनं (नयने वा) यस्य असौ भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः अर्थात् क्रोधेन वंकिमभ्रूपुट्योः प्रदीप्तपीतविशालनयनः । सकण्ठसूत्रः कण्ठसूत्रसहितः, अथवा सुवर्णनिर्मित- कण्ठहारसहितः, सतडित् = सविद्युत्, 'तडित्सौदामनी विद्युत्' इत्यमरः । घन इव = मेघ इव (स्थितः), युर्गानधने युगनाशे, प्रलयकाले, युगान्ते वा, हरस्य = शिवस्य, विश्वसंहारकस्येत्यर्थः, प्रतिमाकृतिः समानमूर्तिः, मूर्तिरिवा- कृतिः, प्रतिमा = मूर्ति तद्वत् आकृतिः रूपवानयं राक्षस इति शेषः ।

**समासः**- तरुणर विकर प्रकीर्णकेशः - तरुणश्चासौ रविः तरुणरविः (कर्म- धारय समासः) तस्य कर इव प्रकीर्णः केशाः यस्य सः तथोक्तः (बहुव्रीहिस०)। भ्रुकुटिपुटोज्ज्वल पिङ्गलायताक्षः - भ्रुकुटिपुट्योः उज्ज्वलं यस्मिन् तथैव पिङ्गलं आयतञ्च अच्चिर्यस्य, पिङ्गले आयते अक्षिणी वा सः तथोक्तः (बहु० स० ) । सकण्ठसूत्रः- कण्ठे धारितं सूत्रं कण्ठसूत्रं (स०स०) अथवा कण्ठस्य सूत्रं ( १० स००) कण्ठसूत्रं तेन सह

वर्तते य सः (तृतीया स० गर्भित बहु० स०)। सतडित्-तडिता सह सतडित् (तृ० स०) वर्तते यः स ( बहु० स०)। युगनिधने - युगस्य निधने अन्ते ( ष० स०) इति युगनिधने । हरस्य - हरति दुःखमिति हरः, तस्य हरस्येत्यर्थः । प्रतिमाकृतिः- प्रतिमा इव आकृतिः यस्य सः (बहुव्रीहि स००) तथोक्तः अथवा प्रतिमा या आकृतिरिव आकृतिर्यस्य स तोथोक्तः ।

---

प्रथमः - भोस्तात ! कोनु खल्वेषः ?

**ग्रहयुगलनिभाक्षः पीनविस्तीर्णवक्षाः कनककपिलकेशः पीतकौशेयवासाः ।**

**तिमिरनिवहवर्णः पाण्डरोद्धृत्तदंष्ट्रो नव इव जलगर्भो लीयमानैन्दुलेखः ॥ ५॥**

द्वितीयः क एष भोः !

**कलभदशनदंष्ट्रो लाङ्गलाकारनासः करिवरकरबाहुर्नीलजीमूतवर्णः ।**

**हुतहुतवहदीप्तो यः स्थितो भाति भीमत्रिपुरपुरनिहन्तुः शङ्करस्येव रोषः ॥ ६॥**

---

**अन्वयः**- ग्रहयुगल निभाक्षः, पोनविस्तीर्णवक्षाः, कनककपिलकेशः, पीत- कौशेयवासाः, तिमिरनिवहवर्णः, पाण्डुरोद्धृत्तदंष्ट्रः, लीयमानेन्दुलेखः, नवः, जलगर्भ इव (दृश्यते) ॥ ५ ॥

**शब्दार्थः**- ग्रहयुगलम्-सूर्यचन्द्र इव नयनयुगलम्, पीनः-विशालः, विस्तीर्णवक्षाः- प्रसारितवक्षस्थलाः। कनककपिलकेशः – सुवर्णवर्णयुक्ताः केशाः, पीतकौशेयवासाः – पीतवस्त्रविशेषाः, तिमिरनिवहवर्णः- अन्धकारयुक्तस्वरूपविशेषः, पाण्डरोद्धृत्तदंष्ट्रः- पाण्डुरवर्णेनाच्छादितः धवलदन्तपङ्क्तिः, लीयमानेन्दुलेखः- इन्दुकला इव, नवः - नूतनम्, जलगर्भ इव- जलपूर्ण इव।

**व्याख्या** - ग्रह युगल निभात्तः = चन्द्रसूर्यग्रहद्वयसदृशनयनः, पीनविस्तृर्ण- वक्षाः = स्थूलविस्तृतोरुः (वक्षस्थलः), 'पीनपीब्नी तु स्थूलपीवरे' - इत्यमरः, 'उरो वत्सं च वक्षश्च' - इत्यमरः । कनककपिलकेशः सुवर्णपिङ्गलबालः । पीतकौशेयवासाः = पोतकृमिकोशोत्थवस्त्रष्टतः, 'कौशेयं कृमिकोशोत्थम्' इत्यमरः, तिमिरनिवहवर्णः = अन्धकारसमूहरूपः । पाण्डरोद्धृत्तदंष्ट्रः = पीत- वर्णवहिर्भूतदशनः (दन्तः),

लीयमानेन्दुलेखः निमज्जितचन्द्रलेखः, नवः = नूतनः, जलगर्भः = जलपूरितमध्यभागः (एवंभूतः मेघः), इव सदृशः, दृश्यते इति शेषः ।

**समासः**- ग्रहयुगलनिभाक्षः- ग्रहयो र्युगलं ग्रहयुगलं, (१० स०) तन्निभे अक्षिणी ( = नेत्रे) यस्य स ग्रहयुगलनिभाक्षः (बहु० स०), पीन- विस्तीर्णवक्षाः - पीनं विस्तीर्ण वक्षः यस्य स पीनविस्तीर्णवक्षाः (बहुव्री० स०), कनककपिलकेशः - कनकम् इव कपिलः केशः यस्य स (बहु० स०) तथोक्तः, पीतकौशेयवासः - पीतं कौशेयं वासः यस्य स (बहु० स०) तथोक्तः, तिमिर- निवहवर्णः = तिमिरस्य निवहः समूह (१० स०) तिमिरनिवहः (तत्सदृशः) वर्णः यस्य सः (बहु० स०) तथोक्तः, पाण्डरोद्धृत्तदंष्ट्रः - पाण्डरा उद्धृत्ता ( = बहिर्भूता) दंष्ट्रा यस्य सः (बहु० ब्री० स०) तथोक्तः, लीयमानेन्दु- लेखः- लीयमाना इन्द्रोर्लेखा यस्मिन् सः (बहु० स०), जलगर्भः- जलं गर्ने यस्य सः (बहु० स०) तथोक्तः ।

**अन्वयः**- कलभदश नदंष्ट्रः, लाङ्गुलाकारनासः, करिवरकरबाहुः, नील- जीमूतवर्णः, हुतहुतवहदीप्तः, यः (अग्रे) स्थितः (अस्ति), त्रिपुरपुरनिहन्तुः, शङ्करस्य, रोष इव, भीमः भाति ॥ ६ ॥

**शब्दार्थः**- कलभदशनदंष्ट्रः- बालगजस्य दन्तपङ्क्तयः, लाङ्गला कारनासः- हलसदृशनासिका, करिवरकरबाहुः – गजशुण्डवद् बाहुः, नीलजीमूतवर्णः-नीलमेघस्य वर्णः, हुतहुतवहदीप्तः - प्रदीप्ताग्निदेवसदृशः, स्थितः - दण्डायमानः, त्रिपुरपुरनिहन्तुः - त्रिपुरराक्षसकुलस्य नाशकः, शङ्करस्य- शिवस्य, भीमः – पाण्डुपुत्रः, भाति = प्रतीयते।

**व्याख्या**- कलभदशनदंष्ट्रः = करिशावकदशन इव किञ्चिदुद्भिन्नः दंष्ट्रः, अर्थात् इषद्बहिर्भूतदन्तः, 'कलभः करिशावकः' इत्यमरः, लाङ्गलाकारनासः - हलाकारनासिकायुक्तः, 'लाङ्गलं हलम्' इत्यमरः, करिवरकरबाहुः = श्रेष्ठगज- शुण्डसदृशबाहुः, नीलजीमूत' वर्णः = श्याममेघः इव (श्यामजलधर इव) कान्तिमान्, हुतहुतवहदीप्तः = आहुति ग्रहिता हुतवहः = अग्निरिव प्रदीप्तः अर्थात् हुताग्निरिव प्रज्वल्यमानः; यः राक्षसः, ( मम अग्रे) स्थितः = विराजमानः ( अस्ति स ); त्रिपुरपुरनिहन्तु = त्रिपुरासुर

नगरविनाशकस्य, शङ्करस्य = शिवस्य, रोष इव क्रोध इव, भीमः भयङ्करः (अथवा भीमसेन इव), भाति = अवभासते, प्रतीयते इत्यर्थः ।

**समासः** - कलभदशनदंष्ट्रः - कलभस्य दशन इव (प. त.) दंष्ट्रः यस्य सः (बहु० स०) तथोक्तः; लाङ्गलाकारनासः- लाङ्गलस्य आकार इव नासा यस्य सः (उ० स०) तथोक्तः, करिवरकरबाहुः - करिवरस्य कर इव ( शुण्ड इव) बाहुर्यस्य सः तथोक्तः, नीलजीमूतवर्णः- नीलश्चासौ जीमूतश्च इति नीलजीमूतः (कर्मधारयसमासः - विशेष्यविशेषणसमासः) तस्य वर्ण इव वर्णो यस्य सः (बहु० स०) तथोक्तः हुतहुतवहदीप्तः- हुतः (= हवनसाम- ग्रिभिर्प्रज्वलितः) हुतवहः- हुतस्य वहः (१० स०) हुतवहः अथवा हुतं बहतीति हुतवहः = अग्निः; तद्वत् ( हुतः हुतवह इव) दीप्तः यः (बहु० स०), त्रिपुरपुरनिहन्तुः - त्रिपुरस्य पुरम् ( = नगरम् ) त्रिपुरपुरम् (१० त०); तस्य (त्रिपुरपुरस्य निहन्ता इति त्रिपुरपुरनिहन्ता ( = शिवः) तस्य त्रिपुरपुरनिहन्तुः, शङ्करस्य - शम् कल्याणं करोति इति शङ्करः तस्य शङ्करस्य ।

---

तृतीयः - भोस्तात ! को नु खल्वयमस्मान् पीडयति ।

**वज्रपातोऽचलैन्द्राणां श्येनः सर्वपतत्त्रिणाम् । मृगेन्द्रो मृगसंघानां मृत्युः पुरुषविग्रहः ।। ७ ।।**

---

**अन्वयः**- (अयं) अचलेन्द्राणां (कृते) वज्रपातः, सर्वपतस्त्रिणां (कृते) श्येनः, मृगेन्द्रसंघानां (कृते) मृगेन्द्रः (एवं भूतः) मृत्यु एव पुरुषविग्रहः (अस्ति) ॥ ७ ॥

**व्याख्या** - अचलेन्द्राणां पर्वतराजानां, वज्रपातः वज्रपतनः वज्राघात इत्यर्थ । सर्वपतस्त्रिणां = सर्वपक्षिणां, श्येनः शशादनः, 'शशादनः पत्त्री श्येनः' इत्यमरः, 'बाज पक्षी' इति लोकभाषायां प्रसिद्धः । मृगसंघानां मृगसमूहानां, मृगेन्द्रः = सिंहः, मृत्यु एव = मरण एव, 'मृत्युर्मरणं निधनोऽस्त्रियाम्' - इत्यमरः, पुरुषविग्रहः = पुरुषशरीरः, 'विग्रहः समरे काये' इत्यमरः, (अव- लोक्यते इति शेषः) ।

समासः - अचलेन्द्राणां - अचलेषु इन्द्रः (स० त० स०) अन्चलेन्द्रः तेषाम् अचलेन्द्राणां, सर्वपतत्त्रिणां सर्वे च ते पतत्त्रिणः सर्वपतस्त्रिणः तेषां सर्वपतस्त्रिणां अथवा सर्वेषां पतस्त्रिणां सर्वपतत्त्रिणां, मृगसंघानां

- मृगाणां संघः (१० स०) मृगसंघः, तेषां मृगसंघानां; मृगेन्द्रः - मृगाणां इन्द्रः (१० स०) मृगेन्द्रः, पुरुषविग्रहः - पुरुषस्य विग्रह (१० स०) पुरुषविग्रहः ।

---

ब्राह्मणी- अय्य ! को एसो अम्हाअं संदावेइ । [ आर्य ! क एषोऽ स्मान् सन्तापयति । ]

घटोत्कचः - भो ब्राह्मण ! तिष्ठ तिष्ठ ।

**किं यासि मद्भयविनाशितधैर्यसारो वित्रस्तदार सुतरक्षणहीनशक्ते ! ।**

**तार्क्ष्याग्रयपक्षपवनोद्धतरोषवह्नि- तीव्रः कलत्रसहितो भुजगो यथार्तः ॥ ८ ॥**

---

**अन्वयः**- (अरे!) वित्रस्तदारसुतरक्षणहीनशक्ते ! मद्भयविनाशित- धैर्यसारः, (तथापि त्वं) किं यासि ? यथा तार्याग्रथपच्क्ष पवनोद्धतरोषवह्नितीव्रः, कछत्रसहितः, आर्तः भुजगः (शीघ्रं प्रयाति) ॥ ८ ॥

**शब्दार्थः**- भोः- वित्रस्त- भीतः, दारसुत- पत्नीपुत्रम्, रक्षणहीनशक्ते- रक्षणे असमर्थः, मद्भय- मम भयम्, विनाशितधैर्यसारः- विगलितधैर्यम्, यासि- गच्छसि, तार्क्ष्याग्रथपक्षपवनोद्धतरोषवह्नितीव्रः- गरुडस्य पक्षेण सञ्चालितेन व्याजेन वायुना उदीप्तः वह्निविशेषः, कलत्रसहितः- पत्नीसहितम्, आर्तः - पीडितः, भुजगः- सर्पः, प्रयाति-याति।

**व्याख्या**-तार्याग्रथपक्षपवनोद्धतरोषवह्नितीव्रः गरुडपक्षाग्रवायुबर्द्धित- क्रोधाग्निवेगः, 'गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः' - इत्यमरः । कलत्रसहितः = भार्यासहितः, आर्तः पीडितः, दुःखितः, भुजगः सर्पः, यथा = यादृशः, प्रयाति (तथैव) अहो, वित्रस्तदारसुतरक्षगही नशक्ते = भयभीत स्त्री-पुत्रसंरक्षणहीनबल ! मद्भयविनाशितधैर्यसारः - अस्मद्भयविनष्टधैर्यबलः (त्वमिति शेषः), किं कथं, यासि गच्छसि ? ।

**समासः**- वृत्तस्य = कश्यपमुनेः अपत्यंपुमान् ताचर्यः (गरुडः) तस्य ताचर्यस्य (गरुडस्य) अग्रयपक्षाभ्यां ( पच्चकोरकाभ्यां समुत्पन्नेन पवनेन ( = वायुना) उद्धतः (= प्रज्ज्वलितः) रोषाग्निः (= कोपाग्निः) तेन तीव्रः = तीक्ष्णः उत्तेजितो वा यः असौ (बहु० स०), कलत्रसहितः- कलत्रेण सहितः (तृ० स०) कलत्रसहितः, भुजगः - भुजैर्गच्छतीति (यः सः) भुजतः, वित्रस्तदारसुतरक्षणहीनशक्ते ! - वित्रस्ताः

दाराः सुताश्च इति वित्रस्त- दारसुताः तेषां रक्षणे हीना शक्तिर्थस्य तत्सम्बुद्धौ हे वित्रस्तदारसुतराण-हीनशक्ते ! (बहु० स०), मद्भयविनाशितधैर्यसारः- मद्भयेन (भयात् वा ) विनाशितः धैर्यस्य सारः यस्य स तथोक्तः ।

---

भो ब्राह्मण ! न गन्तव्यं न गन्तव्यम् ।

वृद्धः - ब्राह्मणि ! न भेतव्यम् । पुत्रकाः ! न भेतव्यम् । सविमर्शा ह्यस्य वाणी ।

---

**व्याख्या**-पुत्रकाः-पुत्रा एव पुत्रकाः, स्वार्थ कप्रत्ययः । सविसक्षों विमर्शेन विचारेण युक्ता इति विचारयुक्ता अर्थात् विचारणीया इत्यर्थः ।

---

घटोत्कचः- भोः, कष्टम् !

**जानामि सर्वत्र सदा च नाम, द्विजोत्तमाः पूज्यतमाः पृथिव्याम् ।**

**अकार्यमेतच्च मयाऽद्य कार्यं, मातृनियोगादपनीय शङ्काम् ॥ ९ ॥**

---

**अन्वयः**-द्विजोत्तमाः नाम, पृथिव्यां सर्वत्र सदा च पूज्यतमाः (सन्ति इति अहं) जानामि, (तथापि ) मातुः नियोगात् शङ्काम् अपनीय अद्य मया एतत् अकार्यं च कार्यम् (अस्ति) ॥ ९ ॥

**शब्दार्थः** - द्विजोत्तमाः – उत्तमब्राह्मणाः, पृथिव्यां - भूवि, पूज्यतमाः - वन्द्यनीयाः, जानामि = अवगच्छामि, मातुः – जनन्याः, नियोगात् = आदेशात्, शङ्काम् = समस्यायाम्, अपनीय - त्यत्त्वा, एतत् - इदम्, अकार्य- असारकार्यमिति, कार्यम् – करणीयम्।

**व्याख्या**-द्विजोत्तमाः = श्रेष्ठब्राह्मणाः, नाम = नामधेयं, पृथिव्यां = जगति, सर्वत्र सर्वस्मिन् देशे काले वा सर्वतो भावेन च, सदा निरन्तरं, पूज्यतमाः = अति पूजनीयाः (सन्ति) इति अहं); जानामि वेद्मि; (तथापि ); मातुः = मम जनन्याः, नियोगात् = प्रेरणया, आज्ञया, आदेशात् वाः शङ्कां = हृदय- संकोचवृत्ति, भयभावनां वा, अपनीय = दूरीकृत्य, परित्यज्य वा, अद्य = अस्मिन् दिवसे, इदानीं; एतत् = इदम्, अकार्य = अकरणीयं, निन्दितं (ब्राह्मण- वधरूपनीचकर्म इति भावः); कार्य = कर्तुं योग्यमस्ति । महदन्तरं सुच्यते, एकस्मिन् ब्राह्मणस्य पूज्यश्वं अपरस्मिन् मातृभक्ति र्बलियसी अत्र चद्वयेन मां शोकर्यात ।

**समासः** - द्विजोत्तमा द्विजानां मध्ये अथवा द्विजेषु उत्तमाः द्विजो- त्तमाः अकार्यन कार्यं अकार्य (नञ् तत्पुरुषसमासः)

---

वृद्धः - ब्राह्मणि ! किं न स्मरसि तत्रभवता जलक्लिन्नेन मुनिनोतं- अनपेतराक्षसभिदं वनमप्रमादेन गन्तव्यमिति । तदेवोत्पन्नं भयम् ।

ब्राह्मणी - किं दाणिं अय्यो मज्झत्थवण्णो विअ दिस्सदि । [ किमि दानीमार्यो मध्यस्थवर्ण इव दृश्यते । ]

---

**व्याख्या**- अनपेक्षतराक्षसम्- अनपेतः - न अपेतः (= गतः, रहितः)

अनपेतः अर्थात् संकुलः व्याप्तो वा, अनपेताः (अतिशयेन भरिताः) राक्षसाः यत्र तत् अनपेतराक्षसम् (बहु० स०) अर्थात् राक्षसों से भरापूरा यह वन स्थान है। यह वन का विशेषग है ।

**समासः** - अप्रमादेन-न प्रमादेन (नञ् समासः)

---

वृद्धः - किं करिष्यामि मन्दभाग्यः ?

ब्राह्मणी - णं विक्कोसाभो [ ननु विक्रोशामः । ]

प्रथमः - भवति ! कस्य वयं विक्रोशामः ?

---

**समासः** - मन्दभाग्यः - मन्दं भाग्यं यस्य स मन्दभाग्यः अर्थात्, भाग्यहीनः । विक्रोशामः - त्रातुं क्रन्दामः इत्यर्थः ।

---

**इदं हि शून्यं तिमिरोत्करप्रभैर्नगप्रकारैरवरुद्धदिक्पथम् ।**

---

**खगैर्मृगैश्चापि समाकुलान्तरं वनं निवासाभिमतं मनस्विनाम् ॥ १० ॥**

---

**अन्वयः** - हि इदं (वनं) शून्यं (अस्ति), तिमिरोस्करप्रभैः, नगप्रकारैः, अवरुद्धदिक्पथम्, खगैः, मृगैः चापि समाकुलान्तरं, (एतादृशं) वनं, मनस्विनां निवासाभिमतं (वर्तते) ॥ १० ॥

**शब्दार्थः** - हि = वस्तुतः, इदं-तत्, शून्यं- रिक्तम्, तिमिरोत्करप्रभैः- घनान्धकारैः, नगप्रकारैः- पर्वतविविधैः, अवरुद्धदिग्पथम् – अवरुद्धमार्गः, खगैः- पक्षिभिः, , मृगैश्चापि -पशुभिश्च, समाकुलान्तरं- आभन्तरपर्यन्तम्, मनस्विनां- मनस्वीजनानाम्, निवासाभिमतं- निवासयोग्यम्।

**व्याख्या** - हि = यतः, इदं एतत्, वनम् विपिनं, 'अटव्यरण्यं विपिनं गहनं काननं वनम्' - इत्यमरः । शून्यं निर्जनम्, तिमिरोत्करप्रभैः अन्ध- कारसमूहप्रभाभिः, नगप्रकारैः पर्वतवृक्षप्रकोटाभिः, विभिन्न पर्वत- गहन- वृत्तसमूहैरित्यर्थः; अवरुद्धदिक्पथम् = आवृतदिशाभागम्, खगैः = पक्षिभिः, मृणैश्चापि = पशुभिश्चापि, समाकुलान्तरं परिव्याप्तान्तरमार्गम्, मनस्विनां = परित्रुद्धचेतसां, विवेकशालिनामित्यर्थः, निवासाभिमतं = स्थातुं योग्यमस्तीति- भावः ।

**समासः** - तिमिरोत्करप्रभैः तिभिरस्य ( अन्धकारस्य) उत्करः ( = राशिः) इति तिमिरोत्करः (ष० स०); तस्य प्रभाभिः (= छटाभिः ); नगप्रकारैः = न गच्छति इति नगः (= पर्वतः, वृत्तश्च), तेषां प्रकारैः, अवरुद्धदिक्पथम् - ३. वरुद्धः दिशां पथः (= मार्गः) यत्र तत् (बहु० स०); खगैः खे ( = आकाशे) गच्छतीति खगः (पक्षी) तैः । समाकुलान्तरं - सम्यक् आकुलं समाकुलं अन्तरं यस्य तत् (बहु० स० ); मनस्विनां - मनोऽस्यास्तीति मनस्वी तेषां मनस्विनामिति । निवःसाभिमतं - निवासस्य अभिमतं ( ष० स०) अथवा निवासाय अभिमतं ( = उपयुक्तं ) (च० स०)।

---

वृद्धः- ब्राह्मणि न भेतव्यं, न भेतव्यम् । मनस्विजननिवास- योग्यमिति श्रुत्वा विगत इत्र से संत्रासः । शङ्के नातिदूरेण पाण्डवाश्रमेण भवितव्यम् । पाण्डवास्तु,

---

**शब्दार्थः** - मनस्विजननिवासयोग्यम् – मनस्वीजनानां निवासयोग्यम् ।

**समासः**- मनस्विजनानां निवासयोग्यम् (१० स०) इति तथोक्तम् ।

**शब्दार्थः** - पाण्डवाश्रमेण = पाण्डवानाम् आश्रमे ।

**समासः**- पाण्डवानां आश्रमः पाण्डवाश्रमः (ष० स०) तेन । 'पाण्डवा- श्रमेण' में कर्ता में तृतीया है।

---

**युद्धप्रियाश्च शरणागतवत्सलाश्च दीनेषु पक्षपतिताः कृतसाहसाश्च ।**

**एवंविधप्रतिभयाकृतिचेष्टितानां दण्डं यथार्हमिह धारयितुं समर्थाः ॥ ११ ॥**

**अन्वयः**- युद्धप्रियाः च, शरणागतवत्सलाः च, दीनेषु पक्षपतिताः कृतसाहसाः च, अत्र चत्रयेण सर्वत्र समप्राधान्यं सूच्यते कविना; एवं विधं प्रतिभयाकृतिचेष्टितानां यथार्ह दण्डं समर्थाः (सन्ति) ॥ ११ ॥

**शब्दार्थः** - युद्धप्रियाः - समररसिकाः, शरणागतवत्सलाः – शरणे समागतानां पतिः दयालुः वा, दीनेषु- दुःखीजनेषु, पक्षपतिताः = सपक्षे पीडितानां सहायं करोति यः, कृतसाहसाः च- साहसशीलाः, यथार्हः = यथोचितः, दण्डं- दण्डविधानम्, धारयितुं- प्रदातुम्, समर्थाः -शक्ताः योग्याः वा।

**व्याख्या**- युद्धप्रियाः = समररसिकाः, 'समरानीकरणाः कलहविग्रहौ' इत्यमरः, शरणागतवत्सलाः = शरणागतं प्रति स्निग्धाः, "स्निग्धस्तु वत्सलः'- इत्यमरः । दीनेषु = पीडितेषु, भीतेषु, पक्षपतिताः पक्षपातिनः, पक्षगृहीताः; कृतसाहसाश्च दमनशीलाः, साहससम्पन्नाश्च; एवंविधप्रतिभयाकृतिचेष्टितानां = एतादृशभीषणरूपधारिणां, व्यवहर्तृणां च, 'भीषणं भयङ्करं प्रतिभया' इत्यमरः । यथार्ह = यथायोग्यं, (रौद्रं), दण्डं दण्डविधानं, धारयितुं = प्रदातुं, समर्थाः = शक्ताः, बलिनः (सन्ति ) ।

**समासः** - युद्धप्रियाः = युद्धं प्रियं येषां ते युद्धप्रियाः (बहु० स०)। शरणागतवत्सलाः - शरणागतेषु वत्सलाः शरणागतवत्सलाः (स०स० ); पक्षपतिताः-पक्षे पतिताः (स० स०) पक्षपतिताः, कृतसाहसाः- कृतं साहसं यैः ते कृतसाहसाः । एवंविधप्रतिभयाकृतिचेष्टितानां - एवंविधं प्रतिभयं आकृतिः चेष्टितं च येषां तेषां बहुमणीहीसमासः) ।

---

प्रथमः - भोस्तात ! न तत्र पाण्डवा इति मन्ये ।

वृद्धः- कथं त्वं जानीषे ?

प्रथमः श्रुतं मया तस्मादागच्छता केनचिद् ब्राह्मणेन शतकुम्भं नाम यज्ञमनुभवितुं महर्षेर्धौम्यस्याश्रमं गता इति ।

वृद्धः- हन्त, हताः स्मः

प्रथमः - तात ! न तु सर्व एव । आश्रमपरिपालनार्थमिह स्थापितः किल मध्यमः । वृद्धः- यद्येवं, सन्निहिताः सर्वे पाण्डवाः ।

---

**व्याख्या**-यज्ञमनुभवितुं = यज्ञेषु सम्मिलितुमिति भावः । आश्रमपरिपालनार्थं = आश्रमरक्षार्थं; आश्रमस्य परिपालनार्थं (प० स०) मध्यमः = भीमः, भीमसेनः कुन्तीपुत्रेषु मध्यमः पुत्रः । सन्निहिताः = समीपस्था इत्यर्थः ।

---

प्रथमः - स चाप्यस्यां वेलायां व्यायामपरिचयार्थं विप्रकृष्टदेशस्थ इति श्रूयते ।

वृद्धः- हन्त, निराशाः स्मः । भवतु पुत्र, व्यपाश्रयिष्ये तावदेनम् । प्रथमः - अलमलं परिश्रमेण ।

वृद्धः पुत्र ! निर्वेदप्रत्यर्थिनी खलु प्रार्थना । भवतु, पश्यामस्तावत् । भो भोः पुरुष ! अस्त्यस्माकं मोक्षः ?

घटोत्कचः - मोक्षोऽस्ति समयतः ।

वृद्धः- कः समयः ?

घटोत्कचः- अस्ति मे तत्रभवती जननी । तयाऽहमाज्ञतः । पुत्र ! ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चिन्मानुषः प्रतिगृह्यानेतव्य इति । ततो मयाऽऽसादितो भवान् ।

---

**व्याख्या** - वेलायां = काले, समये वा, 'अब्ध्यम्बुविकृतौ बेला कालमर्या- दयोरपि' इत्यमरः । व्यायामपरिचयार्थं = व्यायामं कर्तुः विप्रकृष्टदेशस्थे दूर- देशस्थे, 'स्यादूरं विप्रकृष्टम्' इत्यमरः । व्यपाश्रयिष्ये निवेदयिष्ये, पार्थयिष्ये चा; वि + अप + आ + श्रि लुट् लकारे 'व्यपाश्रयिष्ये' इति रूपं भवति । तुलनीयं भासरचिते स्वप्नवासवदत्ते (१ अंके) व्यपाश्रयणा यथा- 'महती खलु अस्य व्यपाश्रयणा, कथं प्रतिजानीमः ।'

परिश्रमेण अलमलं अर्थात् स्वाध्याभावात् परिश्रमेण अलं व्यर्थमिति भावः । निर्वेदप्रत्यर्थिनी शान्तिभावस्य अभिघातिनीः निर्वेदस्य ( विरागस्य) प्रत्यर्थिनी ( = वैरिणी); 'रिपौ वैरिसपत्नारि

प्रत्यर्थिपरिपन्थिनः' इत्यमरः । अथवा प्रत्यर्थिनी- प्रत्यर्थ अस्ति अस्या इति प्रत्यर्थिनी, 'प्रार्थना' पदस्य विशेषण- रूपेण प्रयुक्तोऽयं शब्दः अर्थात् शान्तिमभिलाषिणी खलु प्रार्थना (याच्ञा) खलु निश्चयेनेत्यर्थः ।

मोक्षः = मुक्तिः, अस्य राक्षसस्य प्रभावात् मुक्तिरिति भावः । समयतः = शपथतः, 'शर्त' इति भाषायां 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः ।

उपवासनिसर्गार्थं = उपवासरूपव्रतस्य पारणार्थमित्यर्थः । उपवासस्य निसर्गार्थ ( = समाप्त्यर्थं) इति उपवासनिसर्गार्थं । प्रतिगृह्य बलादाकृष्य बलपूर्वकं गृहीत्वा; आसादितः = सम्प्राप्तः ।

---

**पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि ।**

**बलावलं परिक्षाय पुत्रमेकं विसर्जय ॥ १२ ॥**

---

**अन्वयः**- (हे वृद्ध ! चारित्रशालिन्या पत्न्या (सह) द्विपुत्रः (सन्) मोत्तम् इच्छसि, (तर्हि) बलाबलं परिज्ञाय एकं पुत्रं विसर्जय ॥ १२ ॥

**शब्दार्थः**- चारित्रशालिन्या- सुशीला, पत्त्या (सह) – धर्मपत्न्या सह, द्विपुत्रः-सुतद्वयः, मोक्षं- मुक्तिम्, इच्छसि – अभिलषति, बलाबलं- बलयुक्तं बलहीनं च, परिज्ञाय -ज्ञात्वा, एकं -एकं त्रिषु पुत्रेष्वेकम्, विसर्जय- त्यज।

**व्याख्या**- चारित्रश। लिन्या = सुचारित्रवर्धिन्या, शीलभावशोभिन्या वा; पत्न्या = धर्मपत्न्या; द्विपुत्रः सुतद्वयः; मोक्षं मत् सकाशात् मुक्ति, (यदि) इच्छसि = अभिलषसि (त्वमिति शेषः); (तर्हि) बलाबलं सबलनिर्बलं प्रियाप्रियं वा, अयं ग्राह्यः अयं त्याज्यः इत्यर्थः । परिज्ञाय सम्यग् ज्ञात्वा; एकं पुत्रं = त्रिषु पुत्रेषु केवलं एकं पुत्रं, विसर्जय = परित्यज, मम कृते इति भावः ।

**समासः**- चारित्रशालिन्या-चारित्रेण शाल्यते यया सा (बहु० स०) तया, द्विपुत्रः- द्वौ पुत्रौ यस्य स (बहु० स०) द्विपुत्रः । बलाबलं - बलश्च अवलश्च तयोः समाहारः बलाबलं (समाहारद्वन्द्वसमासः) । परिज्ञाय- परितः ज्ञात्वा परिज्ञाय, परिपूर्वकं ज्ञाधातोर्ल्यपि कृते एतत् रूपं भवति ।

---

वृद्धः- हं भो राक्षमापसद ! किमहमब्राह्मणः ?

**ब्राह्मणः श्रुतवान्वृद्धः पुत्रं शीलगुणान्वितम् ।**

**पुरुषादस्य दत्त्वाहं कथं निर्वृतिमाप्नुयाम् ॥ १३ ॥**

---

**व्याख्या** - अपसदः नीचः, 'विवर्णः पामरो नीचः अपसदो' इत्यमरः । समासः - राक्षसापसद ! - राक्षसेषु अपसदः इति राक्षसापसदः तत्सम्बुद्धौ, हे राक्षसापसद ! = हे नीचराक्षस! इत्यर्थः ।

**अन्वयः** - अहं वृद्धः श्रुतवान् ब्राह्मणः, शीलगुणान्वितम् पुत्रं, पुरुषादस्य (कृते), दवा, कथं निवृत्तिम्, आप्नुयाम् ॥ १३ ॥

**शब्दार्थः** – अहं- केशवदासः, वृद्धः- वयोवृद्धः, शास्त्रज्ञः- शास्त्रवित्, ब्राह्मणः - विप्रः, शीलगुणान्वितम् = शीलगुणयुक्तः, पुत्रं- सुतम्, पुरुषादस्य – पुरुषस्य, निवृत्तिम् - शान्तिम्, दत्त्वा - प्रदाय, कथं – केन प्रकारेण।

**व्याख्या** - अहं = केशवदासनामाहमिति शेषः, वृद्धः स्थविरः, जरा- वस्थापन्नो वा, 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि' - इत्यमरः । श्रुतवान् = शास्त्रज्ञानी, 'श्रुतं शास्त्रावधृतयो' इत्यर्थः । शीलगुणान्वितम् = शीलगुणसंयुक्तम्; पुत्रं सुतं, आत्मजं 'आत्मजस्तनयस्सुनुः सुतः पुत्रः'- इत्यमरः । पुरुषादस्य मनुष्यभक्षकस्य (कृते); दवा समर्पणं कृत्वा; कथं = केन विधिना, निवृत्ति शान्ति, आप्नुयाम् = प्राप्नुयाम्, न केनापि प्रकारेण सुखशान्ति लभेयमिति भावः ।

समासः - श्रुतवान्-श्रुतं ( = शास्त्रं) अस्ति अस्य इति श्रुतवान् । शीलगुणान्वितम् - शीलञ्च, गुणश्च (द्वन्द्वसमासः) इति शीलगुणौ, ताभ्यां (शीलगुणाभ्यां ) अन्वितः, तम् तथोक्तं, पुरुषादस्य-पुरुषम् अत्ति ( = खादति) य इति पुरुषादः (बहु० स०), तस्य पुरुषादस्य ।

---

घटोत्कचः -

**यद्यर्थितो द्विजश्रेष्ठ ! पुत्रमेकं न मुञ्चसि ।**

**सुकुटुम्बः क्षणेनैव विनाशमुपयास्यसि ॥ १४ ॥**

---

**अन्वयः**- हे द्विजश्रेष्ठ ! यदि अर्थितः (सन्), एकं पुत्रं न मुञ्चसि, (तर्हि) सकुटुम्बः क्षणेनैव विनाशम् उपयास्यसि ॥ १४ ॥

**शब्दार्थः** - द्विजश्रेष्ठ !- हे ब्राह्मणश्रेष्ठ !, अर्थितः - याचितः, एकं - त्रिष्वेकं, पुत्रं- सुतम, न- नहि, मुञ्चसि - परित्यजसि, सकुटुम्बः = कुटुम्बसहितं, क्षणेनैव - क्षणमात्रेणैव, विनाशम्- विघ्नम्, उपयास्यसि - प्रप्स्यसि ।

**व्याख्या**-द्विजश्रेष्ठ ! = उत्तमब्राह्मण ! द्विजातिषु - ब्राह्मण-क्षत्रिय- अर्थितः = याचितः (सन्), परित्यजसि, मह्यं न ददासि वैश्येषु, श्रेष्ठः = पूज्यतम इति भावः, यदि चेत्, एकं = त्रिषु एकं, पुत्रं सुतं, न नहि, मुञ्चसि इति भावः, (तर्हि), सकुटुम्बः सपरिवारः, क्षणेनैव = क्षणमात्रेणैव, विनाशं = विनष्टं, उपयास्यसि = गमिष्यसि, प्राप्स्यसि ।

**समासः** - द्विजश्रेष्ठ - द्विजेषु अथवा द्विजातिषु श्रेष्ठः (स० त०) तत् सम्बुद्धौ (हे) द्विजश्रेष्ट !, सकुटुम्बः कुटुम्बैः सह (वर्तते यः) सकुटुम्बः (तृ० समासः) ।

---

वृद्धः- एष एव मे निश्चयः ।

**कृतकृत्यं शरीरं मे परिणामेन जर्जरम् ।**

**राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ १५ ॥**

---

**अन्वयः**- सुतापेक्षी (अहं), परिणामेन जर्जरं, विधिसंस्कृतं, कृतकृत्यं, मे शरीरं, राक्षसाग्नौ, होष्यामि ॥ १५ ॥

**शब्दार्थः** - सुतापेक्षी - सुतार्थी, परिणामेन = वृद्धावस्थया, जर्जरं -जीर्णम्, विधिसंस्कृतं- वैदिकविधिना परिष्कृतम्, कृतकृत्यं - कृतार्थम्, राक्षसाग्नौ - राक्षसानलौ, होष्यामि- होमं करिष्यामि।

**व्याख्या**- सुतापेक्षी - पुत्रेच्छार्थी, पुत्रकल्याणाकांक्षीः, अहर्निशं पुत्रमुखदर्शनार्थी इति भावः; परिणामेन वृद्धावस्थया, जर्जरं जीर्णं, विवशं; विधि- संस्कृतं = वैदिकविधिना परिशुद्धं, वैदिकनियमादिपरिपालनेन संस्कारयुक्तं; कृतकृत्यं = कृतार्थं, सफलमनोरथं, मे मम, स्वस्य; शरीरं देहं; क्षणभंगुर- देहं, राक्षसाग्नौ =

राक्षसानले, होष्यामि होमं करिष्यामि । अर्थात् स्वकीय- पुत्ररक्षार्थं निष्प्रयोजनं इदं निजदेहं रातसमुखे पातयिष्यामीति भावः ।

**समासः**- सुतापेक्षी - सुतस्य अपेक्षा सुतापेक्षा (ष० स०), सुतापेक्षा अस्ति अस्य ( यस्य वा स सुतापेक्षी । विधिसंस्कृतम् - विधिना ( = अनुष्ठानेन) संस्कृतं ( संस्कारयुक्तं) इति विधिसंस्कृतं (तृ० स० ); कृतकृत्यं - कृतं कृत्यं येन (बहु० स०) स कृतकृत्यः तं कृतकृत्यं; राक्षसाग्नौ - राक्षस एव अग्निः राक्षसाग्निः, तस्मिन् राक्षसाग्नौ ।

---

ब्राह्मणी - अय्य ! मा मा एवं। पदिमत्तधम्मिणी पदिव्वत्ति णाम । गडीदफलेण एदिणा सरीरेण अय्यं कुलं अ रक्खिदुमिच्छामि ।

[आर्य ! मा मैवम् । पतिमात्रधर्मिणी पतिव्रतेति नाम। गृहीत फलेनैतेन शरीरेणार्यं कुलं च रक्षितुमिच्छामि । ]

घटोत्कचः - भवति ! न खलु ! स्त्रीजनोऽभिमतस्तत्रभवत्या ।

वृद्धः- अनुगमिष्यामि भवन्तम् । घटोत्कचः आः वृद्धस्त्वमपसर ।

प्रथमः - भोस्तात । ब्रवीमि खलु तावत्किञ्चित् ।

वृद्धः - ब्रूहि ब्रूहि शीघ्रम् ।

---

**समासः** - पतिमात्रधर्मिणी - पतिमात्रं धर्मं यस्या सा पतिमात्रधर्मिणी = पतिपरायणा, पतिसेविका इत्यर्थः । गृहीतफलेन - गृहीतं फलं यस्य तत् गृहीतफलं तेन गृहीतफलेन = प्राप्तफलेन, कृतकृत्येन इत्यर्थः ।

**व्याख्या** - स्त्रीजनः = नारीजनः, अभिमतः इष्टः, वांछितः अभिलषितः इत्यर्थः । तत्रभवत्या पूज्यजनन्या, मम मात्रा इति भावः । धर्मशास्त्र- प्रमाणे स्त्री अवध्या अस्ति, यथा महाभारते - 'अवध्यां स्त्रियमित्याहुः' - (गदा० - श्लोक ० १५८)।

**व्याख्या**-त्वं वृद्ध अत अपसर दूरीभव यतः वृद्धमानवशरीरे रक्त- मांसादिरभावात् ।

---

प्रथमः-

**मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम् ।**

**रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान् ॥ १६ ॥**

---

अन्वयः (अहं) मम, प्राणैः, गुरुप्राणान्, परिरक्षितुं, इच्छामि; (अत एव) भवान्, अस्य, कुलस्य, रक्षणार्थं, मां, मोक्तुम्, अर्हति ॥ १६ ॥

एकाङ्कः

३७

**शब्दार्थः** - मम - मदीयम्, प्राणैः- जीवनैः, गुरुप्राणान् – मातापित्रोः प्राणान्, परिरक्षितुं - सुरक्षितुम्, इच्छामि- वाञ्छामि।

**व्याख्या** - मम - निजस्य, प्राणैः- जीवनैः, प्राणदानैः, असुभिः; 'पुंसि भूम्न्यसवः प्राणाः' - इत्यमरः। गुरुप्राणान् मातापित्रोः प्राणान्, परिरक्षितुं = सर्वतो भावेन पातुम, इच्छामि कामये, अभिलषामीतिभावः; (अतः) भवान् = पिता स्वरूपो भवान्, अस्य = वर्तमानस्य, कुलस्य = वंशस्य, रक्षणार्थं = त्रातुं, मां = ज्येष्ठपुत्रं, मोक्तुं परित्यक्तुं, अर्हति समर्थः । अर्थात् मां राक्षसाय दत्वा स्ववंशं परिरक्षितुमस्ति भवानिति शेषः । परि रच् - तुमुन् प्रत्ययः । मोच् + तुमुन् प्रत्ययः ।

**समासः**- गुरुप्राणान् - गुरूणां प्राणाः गुरुप्राणाः (ष० स०), तान् तथोक्तान् ।

---

द्वितीयः - आर्य ! मा मैवम् ।

**ज्येष्ठः श्रेष्ठः कुले लोके पितृणां च सुसंप्रियः ।**

**ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन् ॥ १७ ॥**

---

**अन्वयः**- (हे पित!) कुले, लोके, ज्येष्ठः श्रेष्ठः (अस्ति), पितृणां च सुसंप्रियः (भवति), ततः गुरुवृत्तिम् अनुस्मरन् अहमेव यास्यामि ॥ १७ ॥ शब्दार्थः- (हे पित!) कुले कुल में (वंश-परंपरा में); लोके = इस संसार में, ज्येष्ठः = जेठा (बड़ा लड़का), श्रेष्ठः = सबसे अच्छा, पितृणां च = और पिता का, सुसंप्रियः

अत्यन्त प्रियपात्र (होता है); ततः = इस कारण से, गुरुवृत्तिम् गुरुजनों के प्रति व्यवहार को, अनुस्मरन् = स्मरण करते हुए, अहमेव - मैं (मध्यम) ही, यास्यामि = जाऊँगा ।

**व्याख्या**-कुले = वंशे लोके भुवने, संसारे वा; 'लोकस्तु भुवने जने' इत्यमरः । ज्येष्ठः = अग्रजः, अवस्थायां वरीष्ठः श्रेष्ठः सर्वोत्तमः, पूज्यतमो वा; 'ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः' इति मनुस्मृति, (९.१००)

वचनात् । पितां च = जनकानां च, सुसंप्रियः अतिप्रेमपात्रो भवति । ततः = तस्मात् हेतोः, गुरुवृत्ति पूज्यजनेषु व्यवहारं, अनुस्मरन् संस्मरन्, अहमेव = मध्यम पुत्र एव, यास्यामि गमिष्यामि, राक्षसनुभ्रातृत्र्यर्थमिति भावः ।

**समासः**- गुरुवृत्तिम् - गुरूणां वृत्तिः (ष० स०) गुरुवृत्तिः तां गुरुवृत्तिम् ।

---

तृतीयः - आर्यौ ! मा मैवम् ।

**ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः ।**

**ततोऽहं कतमस्म्यर्दो गुरूणां प्राणरक्षणम् ॥ १८ ॥**

---

**अन्वयः**- ज्येष्ठः भ्राता ब्रह्मवादिभिः पितृसमः कथितः, ततः गुरूणां प्राण- रक्षणं कर्तुम् अहम् अर्हः अस्मि ॥ १८ ॥

**शब्दार्थः** - जेष्ठः = अग्रजन्मा, ब्रह्मवादिभिः - वेदधर्मशास्त्रविद्भिः, पितृसमः = पिता सदृशः, कथितः- उक्तः, गुरूणां - आचार्याणाम्, प्राणरक्षणं- जीवनरक्षणम्, कर्तुं-साधयितुम्, अहम् - तृतीयपुत्रः, अर्हः- योग्यः, अस्मि- भवामि।

**व्याख्या**- ज्येष्ठः - अग्रजन्मा, प्रथमः; आता सोदर्यः, सहोदरः: 'समानो- दर्यसोदर्यसगर्थ्यासहजाः समाः' इत्यमरः, ब्रह्मवादिभिः वेदधर्मशास्त्रविद्भिः, व्यासमन्वादिमहर्षिभिरित्यर्थः, पितृसमः जनकतुल्यः, यथामनुस्मृतौ -

पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातृन् यवीयसः ।

पुत्रवच्चापि वर्त्तरन् ज्येष्ठे भ्रातरि धर्मतः ॥ (मनु० ९।१०८)

कथितः = उक्तः; ततः तस्मात् हेतोः, गुरूणां गुरुजनानां, श्रेष्ठजनानां वा; 'गुरुस्तु गीष्पतौ श्रेष्ठे' -इत्यमरः । प्राणरक्षणं जीवनरक्षणं, कर्तुं = करणाय, अहम् = तृतीयपुत्रोऽहम्, अर्हः योग्यतमः, समर्थवान्; अस्मि = भवामि इति शेषः ।

**समासः** - ब्रह्मवादिभिः - ब्रह्म वेदः, तस्य ब्रह्मणः वादिनः, ब्रह्मवादिनः, तैः ब्रह्मवादिभिः; वेदविद्याविशारदैः, प्राणरक्षणम्-प्राणानां रक्षणं ( ष० स० ) प्राणरक्षणम् ।

---

प्रथमः - वत्स ! मा मैवम् ।

**आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते ।**

**ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ।। १९ ॥**

---

**अन्वयः**- हि आपदं प्राप्तः पिता ज्येष्ठपुत्रेण तार्यते । ततः गुरूणां प्राणरक्षणात् अहमेव यास्यामि ।। १९ ।।

**शब्दार्थः** – हि- यतः, आपदं- दुःखम्, प्राप्तः - ग्रस्तः, ज्येष्ठपुत्रेण- ज्येष्ठसुतेन, तार्यते- उद्धारः क्रियते, ततः- पश्चात्, गुरूणां- ज्येष्ठानाम्, प्राणरक्षणात् = जीवनरक्षणात्, यास्यामि- गमिष्यामि।

**व्याख्या** - हि = यतः, आपदं आपत्ति, प्राप्तः लब्धः, ग्रस्तः; पिता = जनकः, 'तातस्तु जनकः पिता' इत्यमरः । ज्येष्ठपुत्रेण ज्येष्ठसुतेन, गुरूणां =मातृपितृणां, प्राणरक्षणात् = जीवनरक्षणात् हेतोः; 'हेतौ' पञ्चमी अत्र वर्तते । ततः = एतस्मात्, अहमेव = अहं ज्येष्ठपुत्र एव; यास्यामि गमिष्यामि, राक्षसेन सह इति यावत् ।

**समासः** - ज्येष्ठपुत्रेण - ज्येष्ठश्चासौ पुत्रः जेष्ठपुत्रः (कर्मधारयसमासः) तेन ज्येष्ठपुत्रेण । प्राणरक्षणात् -प्राणानां रक्षणं प्राणरक्षणं तस्मात् तथोकात् ।

---

वृद्धः- ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम् ।

ब्राह्मणी-जह अय्यो जेट्ठमिच्छाद तह अहं पि कणिट्ठुमिच्छामि ।

[ यथार्यो ज्येष्ठमिच्छति तथाहमपि कनिष्ठमिच्छामि । ]

द्वितीयः - पित्रोरनिष्टः कस्येदानीं प्रियः ?

---

**समास-व्याख्या**- इष्टतमं अतिशयेन इष्टं इष्टतमः, तं इष्टतमं अत्यन्त- प्रियं; परित्यक्तुं = राक्षसाय दातुं, न शक्नोमि = न समर्थोऽस्मि । आर्यः = स्वामी, ज्येष्ठं = ज्येष्ठतनयं, इच्छति वाञ्छति, कनिष्ठं अनुजं, लघुपुत्रं, 'कनिष्ठोऽति युवाल्पयोः' इत्यमरः; 'कनिष्ठयवीयोऽवरजानुजाः' इत्यमरः । पित्रोः माता च पिता च इति पितरौ (एकशेषद्वन्द्वसमासः), तयोः पित्रोः = जननी- जनकयोरित्यर्थः । अनिष्टः आहितः, प्रियः इष्टः ।

---

घटोत्कचः - अहं प्रीतोऽस्मि । शीघ्रमागच्छ ।

द्वितीयः-

**धन्योऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः ।**

**बन्धुस्नेहाद्धि महतः कायस्नेहस्तु दुर्लभः ॥ २० ॥**

---

**अन्वयः**- (अहम्) धन्यः अस्मि, यत् स्वैः प्राणैः गुरुप्राणाः, परिरक्षिताः; हि बन्धुस्नेहात्, महतः, कायस्नेहस्तु, (अति) दुर्लभः (अस्ति) ॥ २० ॥

**शब्दार्थः** धन्यः - कृतार्थः, अस्मि - भवामि, स्वैः - निजैः, प्राणैः - जीवनैः, गुरुप्राणाः- गुरुजीवनमानि, परिरक्षिताः- परित्राताः, हि - यतः, बन्धुस्नेहात्- आत्मीयस्नेहात्, महतः- श्रेष्ठपुरुषस्य, कायस्नेहस्तु- शरीरस्नेहस्तु, दुर्लभः - अप्राप्यः।

**व्याख्या**- (अहं) = मध्यमपुत्र इति भावः । धन्यः = धन्यवादार्हः, अस्मि = भवामि, यत् स्वैः निजैः, प्राणैः जीवनदानैः, गुरुप्राणाः गुरुजीवनानि, परिरक्षिताः परित्राताः, परिपालिता वा; हि यतः, महतः = महापुरुषस्य, 'जातावेकवचनमिति नियमात् 'महतः' इत्यस्य 'महतां = महापुरुषाणां' इति अर्थो भवति, अतः महतां महापुरुषाणां, बन्धुस्नेहात् = कुटुम्बस्नेहात्, प्रेमभावात्; 'सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः

समाः' इत्य- मरः । कायस्नेहस्तु = शरीरस्नेहस्तु, दुर्लभः अप्राप्यः, न क्वचिदपि महत्सु दृष्टिगोचरो भवति इति भावः ।

**समासः** - बन्धुस्नेहात् बन्धुनां स्नेहः (ष० स०) बन्धुस्नेहः, तस्मात् बन्धुस्नेहात् । कायस्नेहः- कायस्य स्नेहः (ष० स०) कायस्नेहः शरीरा- नुरागः इत्यर्थः ।

---

घटोत्कचः - अहो, स्वजनवात्सल्यमस्य ब्राह्मणवटोः । द्वितीयः भोस्तात ! अभिवादये ।

वृद्धः- एह्ये हिपुत्र !

**विनिमाय गुरुप्राणान् स्वैः प्राणैर्गुरुवत्सल ।**

**अकृतात्मदुरावापं ब्रह्मलोकमवाप्नुहि ॥ २१ ॥**

---

**अन्वयः**- (हे) गुरुवत्सल ! रखैः प्राणैः गुरुप्राणान् विनिनाय, अकृतात्म- दुरावाएं ब्रह्मलोकम् अवाप्नुहि ॥ २१ ॥

**शब्दार्थः**- (हे) गुरुवत्सल !- हे मातृ-पितृभक्त !, स्वैः- निजैः, प्राणैः -जीवनैः, गुरुप्राणान्- मातृपितृजीवनान्, विनिमाय – विनिमयं कृत्वा, अकृतात्मदुरावापं, ब्रह्मलोकं = स्वर्गलोकम्, आप्नुहि- प्राप्नुहि।

**व्याख्या** (हे) गुरुवत्सल ! गुरुप्रिय ! गुरुभक्त !, स्वैः स्वकीयैः, प्राणैः = जीवनैः, जीवनदानैः, गुरुप्राणान् मातृ-पितृजीवनान्, पूज्यञ्जन- प्रागान् वा; विनिमाय = विनिमयं कृत्वा, आदानप्रदानं कृत्वा इत्यर्थः । अकृतात्मदुरावा पं = कृतात्मा = शुद्धात्मा; अकृतात्मा = अशुद्धात्मा, पापी इत्यर्थः, पापात्मादुर्लभ्यं, पापीजनदुष्प्राप्यं वा, ब्रह्मलोकं = स्वर्गलोक, सत्यलोकं, मोक्षधाम वा, आप्नुहि प्राप्नुहिः अर्थात् हे मध्यम ! त्वं मदाशीर्वादेन ब्रह्मणः लोकं ( = वैकुण्ठधाम, मोक्षधाम), लभस्व इत्यर्थः ।

**समासः**- गुरुवत्सल - गुरुषु वत्सलः (स० त०) गुरुवत्सलः तत् सम्बुद्धौ हे गुरुवत्सल ! गुरुप्राणान् - गुरूणां प्राणाः (ष० त०) गुरुप्राणाः, तान् गुरुप्राणान् । विनिमाय- वि+नि+मा+ क्त्वा ल्यपि कृते 'विनिमाय' रूपं भवति । अकृतात्मदुरावा पम् - अकृतात्मभिः (= अशुद्धात्मभिः दुरावापं - दुर + अव +

आप् = दुरावापं, दुःखेन ( कष्टसाध्येन) अवापं अवाप्तुं, प्राप्तुं, शक्यं, योग्यमिति भावः । ब्रह्मलोकः - ब्रह्मणः लोकः (= सत्यधम) ब्रह्मलोकः (१० त०), तं तथोक्तम् ।

---

द्वितीयः अनुगृहीतोऽस्मि । अम्ब' ! अभिवादये ।

ब्राह्मणी - जाद ! चिरंजीव । [ जात! चिरंजीव । ] द्वितीयः - अनुगृहीतोऽस्मि । आर्य ! अभिवादये ।

प्रथमः- एह्येहि वत्स ! t

परिष्वजस्व गाढं मां परिष्वक्तः शुभैर्गुणैः । कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा ॥ २२ ॥

---

**अन्वयः**- (हे वत्स!) शुभैः गुणैः परिष्वक्तः (त्वं) मां गाढं परिष्व- जस्व । (यतः) तव कीर्त्या (एषा) वसुन्धरा परिष्वक्ता भविष्यति ॥ २२ ॥

**शब्दार्थः**- (हे वत्स !) शुभैः- रम्यैः, गुणैः -सदाचारैः, परिष्वक्तः- विभूषितः, अलंकृतः, मां- ज्येष्ठब्रातरं, गाढं- दृढम्, परिष्वजस्व- आलिङ्गस्व, तव – त्वदीय, कीर्त्या- सुयशसा, वसुन्धरा- पृथिवी, परिष्वक्ता – अलंकृता, भविष्यति- प्राप्स्यति।

**व्याख्या** - शुभैः = सुन्दरैः, गुणैः विनयादिगुणैः, दयादाक्षिण्यादि- भिरिति भावः, परिष्वक्तः अलंकृतः, (त्वं मां ज्येष्ठभ्रातरं, गाढं = घनं, दृढतापूर्वकं यथा स्यात् तथा बाहुपाशे निधाय इति भावः, परिष्वजस्व = आलिङ्ग्य, (यतः) तव भवतः, कीर्त्या सुयशसा, 'यशः कीर्तिः समज्ञा च' इत्यमरः । (एषा) वसुन्धरा वसुन्धरा' इत्यमरः । परिष्वक्ता भविष्यति = यास्यति । वसुधा, पृथिवी; 'सर्वसहावसुमती वसुधोर्वी अलंकृता, विभूषिता, गौरवान्विता वा;

**समासः**- वसुन्धरा - वसुं धारयति इति वसुन्धरा ।

---

द्वितीयः- अनुगृहीतोऽस्मि ।

तृतीयः आय ! अभिवादये ।

द्वितीयः स्वस्ति ।

तृतीयः अनुगृहीतोऽस्मि !

द्वितीयः- भोः पुरुष ! किंचिद् ब्रवीमि ।

घटोत्कचः ब्रूहि ब्रूहि शीघ्रम् ।

द्वितीयः- एतस्मिन् वनान्तरे जलाशय इत्र दृश्यते । तत्र मे प्रकल्पित- परलोकस्य पिपासाप्रतीकारं करिष्यामि ।

---

**व्याख्या- समासः** वनान्तरे अन्यत् वनं वनान्तरं तस्मिन् वनान्तरे = वनप्रदेशे, वनस्थ एकस्मिन् भागे इत्यर्थः । प्रकल्पितः (= प्रस्तुतः, निर्धारितः रचितो वा), परलोकः यस्य स प्रकल्पितपरलोकः, तस्य । पिपासाप्रतीकारं - पातुं इच्छा पिपासा (= 'प्यास' इति भाषायां), तस्याः प्रतीकारं ( = उपायं) इति पिपासाप्रतीकारं; अर्थात् अकाले मृतस्य संततिहीनस्य जनस्य परलोके (पितृलोके) जलं न प्राप्नोति अत एव अनेनैव देहेन स्वेनैव जलाञ्जलिं दत्वा परलोकप्रस्तुतस्य मम पिपासा शमनोपायं करिष्यामि इत्यर्थः ।

---

घटोत्कचः - दृढव्यवसायिन् ! गम्यताम् । अतिक्रामति मातुराहार- कालः। शीघ्रमागच्छ ।

द्वितीयः- भोस्तात ! एष गच्छामि ।

(निष्क्रान्तः ।)

वृद्धः- हा हा, परिमुषिताः स्मो भोः ! परिमुषिताः स्मः ।

**यस्त्रिशटङ्गो मम त्वासीन्मनोज्ञो वंशपर्वतः ।**

**स मध्यशृङ्गभङ्गेन मनस्तपति मे भृशम् ॥ २३ ॥**

---

**व्याख्या**- दृढव्यवसायिन् - दृढः व्यवसायः यस्य, स दृढव्यवसायी, तत् सम्बुद्धौ हे दृढव्यवसायिन् = दृढनिश्चयिन् ! अतिक्रामति व्यतीतो भर्वात; आहारकालः = भोजनकालः । वृद्धः केशवदास नामा ब्राह्मणः स्वकीय त्रीन् पुत्रान् त्रिशटङ्ग 'त्रिकूट' पर्वत इव मनुते अतः त्रिषु पुत्रेषु एकस्यापि हानिं न सहते तथा स्वमानसव्यथां प्रकटयति हाहेत्यदिना । परिमुषिताः प्रताडिता, वंचिताः अपहृता वा (वयमिति शेषः) ।

**अन्वयः** - यः तु मम मनोज्ञः वंशपर्वतः त्रिश्रृङ्गः आसीत्, स मध्यश्रृङ्ग- भङ्गेन मे मनः भृशं तपति ॥ २३ ॥

**शब्दार्थः** - मम - मदीयः, मनोज्ञ - सुन्दरम्, मनोहरः, वंशपर्वतः- वंशरूपी पर्वतः, त्रिश्श्रृङ्ग -श्रृङ्गत्रयः, आसीत् – अभूत्, सः - वंशपर्वतः, मध्यश्रृङ्गभङ्गेन- मध्यश्रृङ्गभग्नेन, मे- मम, मनः- चित्तम्, भृशं- अत्यधिकम्, तपति - पीडयतीति।

**व्याख्या** - यस्तु = यो हि, मम वृद्धब्राह्मणस्य, मनोज्ञः = मनोरमः, 'कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मन्जुलम्' इत्यमरः । वंशपर्वतः = संतति- पर्वतः, कुलपर्वतो वा; "सन्ततिगोत्रजननकुलान्यभिजनान्वयौ" - इत्यमरः । त्रिश्रृङ्गः = त्रिशिखरः, आसीत् अभूत्; सः वंशपर्वतः, त्रिशिखरः पर्वतो वा; मध्यश्रृङ्गभङ्गेन = मध्यशिखरत्रोटनेन, मध्यमपुत्ररूपीशिखरविनाशेन इत्यर्थः; हेतौ तृतीया; मे = मम, वृद्धब्राह्मणस्य; मनः चित्तं, हृदयं वा; 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमर। भृशं अत्यधिकं, अत्यर्थ; महुर्मुहुर्वा; तपति = व्यथयति, संतापयति, पीडामनुभावयति वा ।

**समासः**- वंशपर्वतः - वंश एव पर्वतः इति वंशपर्वतः, त्रिश्रृङ्गः - त्रीणि श्रृङ्गाणि यस्मिन् स त्रिश्टङ्गः (बहु० स०), मध्यश्रृङ्गभङ्गेन - मध्यश्चासौ ( = मध्यमश्चासौ वा श्रृङ्गश्च इति मध्यश्रृङ्गः (क०स०) तस्य ( = मध्य-श्रृङ्गस्य) भङ्गः (ष० स०), तेन तथोक्तेन ।

---

हा पुत्रक ! कथं गत एव ।

**तरुण ! तरुणतानुरूपकान्ते ! नियमपराध्ययनप्रसक्तबुद्धे ! ।**

**कथमिव गजराजदन्तभग्नस्तरुरिव यास्यसि पुष्पितो विनाशम् ॥ २४ ॥**

---

**अन्वयः**- (हे) तरुण ! तरुणतानुरूपकान्ते ! नियमपराध्ययनप्रस बुद्धे ! (अस्मिन् क्रूरसंसारे) गजराजदन्तभग्नः पुष्पितः तरिव (त्वं) कथमि विनाशं यास्यसि ॥ २४ ॥

**शब्दार्थः**- (हे) तरुण !- हे युवक!, तरुणतानुरूप- शोभमानस्वरूपम्, नियमपराध्ययनप्रसक्तबुद्धे ! – नियमबद्धः नीतियुक्तेन आबद्धः, अध्ययनरतः मतियुक्तः, गजराजदन्तभग्नः- हस्तिराजदन्तभग्नः, पुष्पितः- पुष्पयुक्तः, विनाशं यास्यसि – विनश्यसि।

**व्याख्या**- हे तरुण ! हे नवयुवक ! हे वयस्क ! 'वयस्थस्तरु युवा' - इत्यमरः । तरुणतानुरूपकान्ते = युवावस्थानुरूपशोभायमान, निय पराध्ययनप्रसक्तबुद्धे! = नियमबद्धाध्ययनरतप्रज्ञे !, नियमपरायणाध्यय तत्परमते !, 'तत्परे प्रसितासक्ती' इत्यमरः । (अस्मिन् क्रूरसंसारकान्तारे गजराजदन्तभग्नः = मदोन्मत्तहस्तिदन्तछिन्नः, विदारितो वा, पुष्पितः = विव सितः, कुसुमभारभरितिः, सरितः वृत्त इव, नदीतटस्थित विटप इव, 'विटपीपादपस्तरुः' इत्यमरः, कथमिव = केन विधिना इव; विनाशं विनाशभावं, याश्यसि = अवगमिष्यसि, प्रणश्यसि इत्यर्थः ।

**समासः** - तरुणता नुरूपकान्ते ! - तरुणस्य भावः तरुणता, ( तरुणतायाः) अनुरूपा कान्तिः (= शरीरशोभा) यस्य सः (बहु० स०), तत्सम्बुद्धौ । नियमपराध्ययनप्रसक्तबुद्धे ! - नियमपरा - नियमः परः यस्याः सा (बहु० स०), बुद्धेर्विशेषणपदम् अस्ति; अध्ययनपरासक्ता - अध्ययने प्रसक्ता (स० तत्पुरुष) अध्ययनपरासक्ता; नियमपरा चासौ अध्ययन- प्रसक्ता च (कर्मधारयसमास) इति नियमपराध्ययनप्रसक्ता, नियमपरा- ध्ययनप्रसक्ता बुद्धिः (= मतिः प्रज्ञा वा) यस्य सः (बहु० स०), तत्संबुद्धौ । अर्थात् अध्ययनतत्पर तथा नियमबद्ध मति (मन) वाले ! गजराजदन्तभग्नः- गजानां ( = हस्तिनां, 'दन्ती मतङ्गजो गजो नागः" इत्यमरः) राजा (ष० स०) गजराजः, 'राजाहसखिभ्यः टच्' इति पाणिनिसूत्रेण टच् प्रत्ययः । तस्य दन्तेन (दन्ताभ्यां वा) भग्नः (त्रुटितः) यः असौ (बहु० स०)।

---

घटोत्कचः - चिरायते खलु ब्राह्मणबटुः । अतिक्रामति मातुराहार- कालः । किन्नु खलु करिष्ये । भवतु, दृष्टम् । भो ब्राह्मण ! आहूयतां तव पुत्रः ।

वृद्धः - आः, अतिराक्षसं खलु ते वचनम् ।

घटोत्कचः - कथं रुष्यति । मर्षयतु मर्षयतु भवान् । अयं मे प्रकृति- दोषः । अथ किन्नामा तव पुत्रः ?

वृद्धः- एतदपि न शक्यं श्रोतुम् ।

घटोत्कचः - युक्तम् । भो ब्राह्मणकुमार ! किन्नामा ते भ्राता ?

प्रथमः - तपस्वी मध्यमः ।

घटोत्कचः - मध्यम इति सदृशमस्य । अहमेवाह्वयामि । भो भो मध्यम ! मध्यम ! शीघ्रमागच्छ ।

(ततः प्रविशति भीमसेनः ।)

भीमसेनः भोः ! कस्यायं स्वरः ।

---

**खगशतविरुते विरौरीति तारंद्रुमगहने दृढसङ्कटे घनेऽस्मिन् ।**

**जनयति च मनोज्वरं स्वरोऽयं बहुसदृशो हि धनञ्जयस्वरस्य ॥ २५ ॥**

---

**अन्वयः** - खगशतविरुते दृढसंकटे द्रूमगहने अस्मिन् वने अयं स्वरः तारं विरौति, मनोज्वरं जनयति च; हि (स्वरोऽयं) धनञ्जयस्वरस्य बहुसदृश (अस्तीति शेषः) ॥ २५ ॥

**शब्दार्थः** - खगशतविरुते – पक्षिशतकलरवे, दृढसंकटे- अतिसंकटे, द्रुममगहने- वृक्षबहुले, अस्मिन् - एतस्मिन्, वने - कानने, अयं – एषः, स्वरः = शब्दः, तारं- उच्चैः, विरौत- शब्दायते च – तथा, मनोज्वरं -मनसंतापः, जनयति- उत्पादयति, हि- यतः, धनञ्जयस्वरस्य -अर्जुनेन उच्चारितस्वरस्य, बहुसदृशः - अतीवसमानः।

**व्याख्या** - खगशत विरुते = पक्षिशतकलरवे, 'वने' इत्यस्य विशेषणपदमस्ति, दृढसंकटे = अति सम्बाधापन्ने, घोरविघ्नबाधापरिपूर्णे; 'संकटं ना तु सम्बाधः' इत्यमरः, द्रुमगहने = वृत्तसंकुले, नानावृत्तादिभिः परिव्याप्ते, अस्मिन् = एत- स्मिन्, वने = विपिने, अरण्ये वा, अयं स्वरः = शब्दोऽयं, तारं = उच्चतरं यथा स्यात् तथा, विरौति ध्वनति, रवति च = तथा, मनोज्वरं = मनसि क्षोभं, संतापं वा, जनयति = प्रादुर्भावयति; हि-यतः, (अयं शब्दः, उच्चारितो ध्वनिः), धनन्जयस्वरस्य - अर्जुनोच्चारितशब्दस्य, बहुसदृशः = अतीवसमानः (अस्ति ) । अर्थात् अयं शब्दः अर्जुनस्य शब्दोच्चारणध्वनेः समानतां भजते इतिभावः ।

**समासः** - खगशत विरुते - खगानां शतं, शतानि वा; खगशतम्, तस्य खगशतस्य, तेषां वा; विरुतः (कलरवः) यत्र (बहु० स०) इति खगशत विरुते । दृढसंकटे-दृढं घनं संकटं यत्र; द्रुमगहने-द्रुमैः (= वृत्तैः) गहने इति द्रुमगहने । मनोज्वरं-मनसः ज्वरं अथवा मनसि ज्वरं इति मनोज्वरं । धनञ्जयस्वरस्य-धनञ्जयस्य स्वरः धनञ्जयस्वरः, तस्य । बहुसदृशः- बहुश्चासौ सदृशश्च (क० स०) इति बहुसदृशः ।

---

घटोत्कचः - चिरायते खलु ब्राह्मणबटुः । अतिक्रामति मातुराहार- कालः । किं नु खलु करिष्ये ? भवतु, दृष्टम् । उच्चैः शब्दापयामि । भो मध्यम ! शीघ्रमागच्छ ।

---

**व्याख्या**- उच्चैः शब्दापयामि - उच्च = उच्चस्वरेण, शब्द् + आप् + णिच्प्रत्ययान्तप्रेरणार्थकधातोः उत्तमपुरुषैकवचने शब्दापयामि' रूपं भवति ।

---

भीमसेनः- भोः, को नु खल्वेतस्मिन् वनान्तरे मम व्यायामविघ्न- सुत्पाद्य मध्यम इति मां शब्दापयति । भवतु, पश्यामस्तावत् । (परिक्रम्या- वलोक्य सविस्मयम् ) अहो ! दर्शनीयोऽयं पुरुषः । अयं हि,

# खण्डः ४

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे मध्यमव्यायोगस्य उत्तरभागः पाठ्यते। तत्र भीमसेनस्य उपस्थितिः, तेन ब्राह्मणकेशवदाशपुत्रेण मेलनम्, घटोत्कचेन साकं सम्भाषणम्, उभयोः युद्धवर्णननम् इत्यादिविषयाः उपस्थाप्यते। अन्तिमे भीमसेनस्य हिडिम्बया साकं मेलनं, केशवदाशस्य मध्यमपुत्रस्य रक्षणं तस्य मुक्तिश्च,घटोत्कचस्य पित्रा साकं मेलनम् इत्यादिविषयाः समालोच्यते। भारतवाक्येन व्यायोगस्य समाप्तिः जायते।

## उद्देश्यम्

- सरलया रीत्या छात्राणां संस्कृतभाषाज्ञानं दृश्यकाव्यमाध्यमेन जायते।

- व्यायोगमाध्यमेन नीतयः पाठ्यन्ते।
- पौराणिककथायाः माहात्म्यं ज्ञातुं शक्यते।
- राक्षसप्रवृत्तिः तेषां जीवनचर्यादिविषयाः ज्ञातुं शक्यते।
- ब्राह्मणकेशदाशस्य मध्यमपुत्रस्य मुक्तिविषये ज्ञानं जायते।

**सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो**

**बभ्रुश्रूः श्येननासो द्विरदपतिहनुर्दीप्तविश्लिष्टकेशः ।**

**न्यूढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांं सबाहुः**

**सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः ॥२६॥**

---

**अन्वयः** - सिंहास्यः, सिंहदंष्ट्रः, मधुनिभनयनः, स्निग्धगम्भीरकण्ठः, बभ्रुभूः, श्येननासः, द्विरदपतिहनुः, दीप्तविश्लिष्टकेशः, व्यूढोरा वज्रमध्यः, गज- वृषभगतिः लम्बपीनांसवाहुः, विपुलबलयुतः, राक्षसीजः लोकवीरस्य पुत्रः (अयं इति) सुव्यक्तं (भवति) ॥ २६ ॥

**शब्दार्थः** - सिंहास्यः – सिंहस्य मुखम्, सिंहदंष्ट्रः – सिंहस्य दन्ताः, मधुनिभनयनः – मदयुक्तनयनः, स्निग्धगम्भीरकण्ठः- कोमलगम्बीरकण्ठदेशः, बभ्रुभूः- पिङ्गलवर्णभ्रुकुटी , श्येननासः- श्येननासिका, द्विरदपतिहनुः - गजपतिरिवहनुः, दीप्तविश्लिष्टकेशः – प्रदीप्त इतस्ततः केशः, व्यूढोरा - विशालवक्षः, वज्रमध्यः - कटिभागः, गजवृषभगतिः- श्रेष्ठहस्तिगमन, लम्बपीनांसबाहुः- विस्तारितसुदृढबाहुः, विपुलबलयुतः – विशालबलयुक्तः, राक्षसीजः- हिडिम्बाजातः, लोकवीरस्य- जगत्श्रेष्ठवीरपुरुषस्य, पुत्रः- सुतः, सुव्यक्तम् - सुस्पष्टमिति।

**व्याख्या** - सिंहास्यः = सिंहसुखः, 'वक्रास्यवदनं तुण्डमाननं लपनं मुखम्' इत्यमरः । सिंहदंष्ट्रः = सिंहदन्तः मधुनिभनयनः = मदिरासहशनेत्रः, 'लोप्चनं नयनं नेत्रस्' इत्यमरः । स्निग्धगम्भीरकण्ठः =

चिवकणगम्भीरगलः, 'कण्ठो गलो' इत्यमरः; 'चिक्कणं मसृणं स्निग्धं' इत्यमरः । बभ्रुश्रूः पिङ्गलवर्णभृकुटी (= भ्रूः); 'बभ्रुर्ना पिङ्गले त्रिषु' इत्यमरः । 'बभ्रु' इत्यस्य 'भूअर' इत्यर्थः भाषायां प्रसिद्धः । श्येननासः = श्येनवत् (बाजपक्षिसदृशनासिकायुक्तः), 'शशादनः पत्त्री श्येनः' इत्यमरः । द्विरदपतिहनुः गजपतिरिव हनुमान् । दीप्तविश्लिष्ट केशः = प्रदीप्तः तथा अस्तध्यस्तबालः, 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः । व्यूढोरा विशालवतः, 'उरो वत्सं च वक्षश्च' इत्यमरः । वज्रमध्यः वज्र इव मध्यभागः, कुलिश इव कटिभागः 'वज्रोऽस्त्री कुलिशं पविः' इत्यमरः । गजवृषभगतिः = श्रेष्ठहस्तिगमनः, लम्बपीनांशबाहु, = लम्बायमान विशालस्कन्ध- बाहुः, 'स्कन्धो भुजशिरोऽसोऽस्त्री' इत्यमरः । विपुलबलयुतः = विशालबल- सम्पन्नः । राक्षसीजः = हिडिम्बाजातः, लोकवीरस्य जगत्प्रसिद्धवीर पुरुषस्य, पुत्रः तनयः, (अस्ति इति) सुव्यक्तं सुस्पष्टं भवतीतिभावः ।

**समासः** - सिंहास्यः- सिंह इव आस्यं यस्य सः सिंहास्यः (बहु० स०) । सिहदंष्ट्रः-सिंहस्य दंष्ट्रा इव दंष्ट्रा यस्य सः सिंहदंष्ट्रः (ब० स०) । मधुनिभः नयनः- मधु ( = मद्यं-'मधु मद्ये पुष्परसे क्षौद्रेपि' - इत्यमरः) - निभे मधुसदृशे नयने यस्य सः मधुनिभनयनः (ब०स०)। स्निग्धगम्भीरकण्ठः-स्निग्धः गम्भीरः कण्ठः यस्य सः (व० स०) । बभ्रुश्रू-बभ्रु भ्रुवौ यस्य सः बभ्रुश्रूः (ब० म०) श्येननासः- श्येनस्य नासा इव नासा यस्य सः (ब० स०)। द्विरदपतिहनुः द्वौ रदौ ( दन्तौ यस्य स द्विरदः, द्विरदः- द्विरदानां पति द्विरदपतिः (ष० स०), तस्य (द्विरदपतेः) हनुरिव हनुः यस्य सः (बहु० स०) । दीप्तविश्लिष्टकेशः - दीप्ताः विश्लिष्टशः व्यस्ताः केशाः यस्य सः (ब० स०) । व्यूढोरा - व्यूढं उरः यस्य सः (ब० स०) । वज्रमध्यः- वज्र इव मध्यः यस्य सः (व० स०) । गजवृषभगतिः- गजवृषस्य (अथवा गजश्च वृषभश्च गजवृषभौ, तयोः गजवृषभयोः) गतिरिव गतिः (गमनं, पादविक्षेपं) यस्य सः(६० स०) । लम्बपीनांशबाहुः- लम्बो पीनांशबाहू-पीनौ अंसौ बाहू अस्य सः (ष० स०) । विपुलबलयुतः - विपुलं च तद् बलं इति विपुलवलं कर्स० स०), तेन (विपुलबलेन) युतः इति विपुलबलयुतः । राक्षसीजः- राक्षस्यां जातः (= उत्पन्नः) इति

राक्षसीजः (स० त०) । लोकवीरस्य - लोके वीरः लोकवीरः (स० तत्पुरुष स०), तस्य लोकवीरस्य । सुव्यक्तं-सुष्ठु सुतरां वा) व्यक्तं सुव्यक्तम् ।

---

घटोत्कचः - चिरायते खलु ब्राह्मणबदुः । उच्चैः शब्दापयामि । भो भो ! मध्यम ! शीघ्रमागच्छ ।

भीमसेनः- भो ! प्राप्तोऽस्मि ।

घटोत्कचः न खल्वयं ब्राह्मणबदुः । अहो ! दर्शनीयोऽयं पुरुषः । य एषः-

**सिंहाकृतिः कनतालसमानबाहु- र्मध्ये तनुर्गरुडपक्षविलिप्तपक्षः ।**

**विष्णुर्भवेद् विकसिताम्बुजपत्रनेत्रो नेत्रे ममाहरति बन्धुरिवागतोऽयम् ॥ २७ ॥**

---

**अन्वयः**- अयं (पुरुषः) सिंहाकृतिः, कनकतालसमानबाहुः, मध्ये तनुः, गरुडपक्षविलिप्तपत्तः, विकसिताम्बुजपत्रनेत्रः, बन्धुरिव विष्णुः आगतः भवेत्, ( यतः) मम नेत्रे आहरति ॥ २७ ॥

**शब्दार्थः**- अयं = आगतपुरुषः, सिंहाकृतिः - सिंहाकाराः, कनकतालसमानवाहुः- सुवर्णतालसमबाहुः, मध्ये- मध्यभागे, तनुः – तनूकृतः, गरुडपक्षविलिप्तपक्षः- गरुड़स्य विष्णुवाहनस्य पक्षविशेषः, विकसिताम्बुजपत्रनेत्रः - विस्फारितपद्मलोचनम्, बन्धुरिव-आत्मीय इव, आगतः -सम्प्राप्तः, भगवान् विष्णुः- वासुदेव इति, मम- मदीयम्, नेत्रे- नयने आहरति – आकर्षति।

**व्याख्या**- सिंहाकृतिः सिंहाकारः, सिंहसमानरूपः, कनकतालसमान- बाहुः = सुवर्णतालवृक्षसदृशभुजः, 'स्वर्ण सुवर्ण कनकं हिरण्यं हेम हाटकम्' इत्यमरः । मध्ये = मध्यभागे, तनुः तनूकृतः, अर्थात् कृशकटिभागः, गरुड- पक्षविलिप्तपक्षः = विष्णुवाहनगरुडपंख इव सुचिक्कणपार्श्वभागः, 'पांजर' इति भाषायाम् । विकसिताम्बुजपत्रनेत्रः = विकसितकमलदललोचनः, बन्धु- रिव = मित्रसदृशः, आगतः = सम्प्राप्तः, समुपस्थितः, विष्णुः = वासुदेवः, श्रीकृष्णो वा, अयं = अयं समागतपुरुषः, मम = हिडिम्बासुतस्य घटोत्कचस्य; नेत्रे = नयने, लोचने वा, आहरति आकर्षति, दृष्टि सम्मोहयति वा मोहनी- मन्त्रेण ।

**समासः**- सिंहाकृतिः- सिंहस्य आकृति इव आकृतिर्यस्य सः (बहु० स०); कनकतालसमानबाहुः - कनकस्य ( स्वर्णस्य) तालः कनकतालः, तेन समानौ बाहू यरय सः (बहु० स०); गरुडपक्षविलिप्तपक्षः- गरुडस्य ( = विष्णुवाहनस्य) पक्षाभ्यां विलिप्तौ पक्षौ यस्य सः (बहु० स०); विक- सिताम्बुजनेत्रः - विकसिते (प्रस्फुटिते) अम्बुजपत्रे इव नेत्रे यस्य सः (उपमा- गर्भित बहु० स०); आहरति-आ हृ लट् आगतः - आ गम् + क्तः ।

---

भो मध्यम ! त्वां खल्वहं शब्दापयामि । भीमसेटः अतः खल्वहं प्राप्तः । घटोत्कचः किं भवानपि मध्यमः ? भीमसेनः न तावद्धरः ।

**मध्यमो ऽहमवध्यानामुत्सिक्तानां च मध्यमः ।**

**मध्यमोऽहं क्षितौ भद्र भ्रातृणामपि मध्यमः ॥ २८ ॥**

---

**अन्वयः**- (हे) भद्र ! अहम् अवध्यानां मध्यमः, उत्सिक्तानां मध्यमः, अहं क्षितौ मध्यमः, आतृणामपि च (अहमेव) मध्यम (अस्मि ) ॥ २८ ॥

**शब्दार्थः**- हे भद्र ! -हे सौम्य !, अहं – भीमः, अवध्यानां- अ.ग्यानाम्, मध्यमः – मध्ये उत्पन्नः, उत्सिक्तान- निष्काषितानाम्, क्षितौ – पृथिव्याम्, च - तथा, भ्रातृणामपि - सोदरामामपि, मध्यमः- मध्ये जातः।

**व्याख्या** - (हे) भद्र ! - हे कल्याण ! 'श्वःश्रेयसं शिषं भद्रं कल्याणं मङ्गलं शुभम् इत्यमरः । अहं भीम, अवध्यानां – हननमयोग्यानां, ब्राह्मणानां वा, मध्यमः = मध्योत्पन्नः; उत्सिक्तानां (गृहात् राज्याद्वा) निष्कासितानां, पाण्डुपुत्राणां (मध्ये), मध्यमः मध्यमभूतः, पाण्डवमध्यमः, अहं = भीमः, क्षितौ = पृथिव्यां, ममः मध्यमनामा, मध्यमलोकपालको वा, च = अपरञ्च आतृणामपि = बन्धूनामपि (मध्ये अहमेव), मध्यमः = मध्ये जातः, 'बीचला' इति भाषायाम्, अस्मि इत्यर्थः ।

**समासः** - अवध्यानां - न वध्यः अवध्यः (न० त०) तेषां अवध्यानां, मध्यमः - मध्ये भवः मध्यमः, 'मध्यान्मः' इति पा० सूत्रेण मप्रत्यये कृते सति 'मध्यमः' इति रूपं सिद्धयति ।

घटोत्कचः - भवितव्यम् ।

भीमसेनः - अपि च,

मध्यमः पञ्चभूतानां पार्थिवानां च मध्यमः । भये च मध्यमो लोके सर्वकार्येषु मध्यमः ॥ २९ ॥

**अन्वयः** - पञ्चभूतानां (मध्ये अहं) मध्यभः, पार्थिवानां ( मध्ये) च मध्यमः, भये च मध्यमः, लोके मध्यमः; सर्वकार्येषु (च) मध्यमः ॥ २९ ॥

**शब्दार्थः** – पश्चभूतानां- पृथिव्यादिपंचभूतानां, मध्यमः- मध्यभूतः, पार्थिवानां- नृपतिनाम्, मध्यमः- मध्ये उत्पन्नः, लोके - संसरे, भये- भयोत्पन्ने, मध्यमः - तटस्थः च - तथा, सर्वकार्येषु – समस्तकार्येषु, मध्यमः – मध्यमस्थ वृत्तिः ।

**व्याख्या** - पञ्चभूतानां पृथिवी अप-तेज वायु-आकाशादीनामित्यर्थः । मध्यमः = मध्यभूतः, पार्थिवानां पृथिवीपतीनां, च मध्यमः = मध्यमोत्पन्नः, अथवा क्षत्रियत्वेन मध्यमलोकपालो वा; लोके जने, भुवने; 'लोकस्तु भुवने जने' इत्यमरः, मध्यमः, भये भयोत्पन्ने (सति), मध्यमः = निर्भयः, उदासीनो, तटस्थो वा, सर्वकार्येषु च समस्तजगद्व्यापारेषु च, मध्यमः = मध्यस्थवृत्ति (अहम् अस्मि इत्यर्थः) ।

**समासः**- पञ्चभूतानां पञ्चानां भूतानां समाहारः पञ्चभूतम्, तेषां पञ्च- भूतानां । पार्थिवानां - पृथिव्या ईश्वरः (= राजा; पतिर्वा पार्थिवः, तेषां पार्थिवानां । सर्वकार्येषु - सर्वाणि च तत्कार्याणि सर्वकार्याणि, अथवा सर्वं च तत्कार्यं सर्वकार्यं, तेषु सर्वकार्येषु ।

---

वृद्धः -

**मध्यमस्त्विति संप्रोक्ते नूनं पाण्डवमध्यमः ।**

**अस्मान्मोक्तुमिहायातो दर्पान्मृत्योरिघोत्थितः ॥ ३० ॥**

---

**अन्वयः** - तु नध्यम इति संप्रोप्ते (सत्ति), नूनं पाण्डवमध्यमः (अयं अस्ति), (यः) दर्पात् मृत्योरिव उत्थितः, अस्मात् मोक्तुम् इह आयात ( अस्तिः) ॥ ३० ॥

**शब्दार्थः** - तु = किन्तु, 'मध्यम इति- मध्यमरूपेण, संप्रोक्ते- कथिते, नूनं = निश्चयम्, पाण्डवमध्यमः- भीमसेनः, दर्पात् - अभिमानात्, मृत्योरिव - मराणादिव, उत्थितः- प्रवृत्तः, अस्मात् – एतस्मात् राक्षसात्, मोक्तुम्- मोचयितुम्, इह - अत्र, आयातः - समागतः।

**व्याख्या** - तु = किन्तु, मध्यम इति 'मध्यम' एवं रूपेण, संप्रोप्ते - समुच्चारिते, कथिते (सति); नूनं अवश्यं, 'नूनमवश्यं निश्चये द्वयम्', 'नूनं तर्केऽर्थनिश्चये' इत्यमरः । पाण्डवमध्यमः = युधिष्ठिरादिषु पाण्डुपुत्रेषु, मध्यमः = भीमसेनः, (अयमस्ति; यः) दर्पात् गर्वात्, अभिमानाद्वा; मृत्योरिद = नाशादिव, मरणादिव, 'मृत्युर्मरणं निधनोऽस्त्रियाम्' इत्यमरः । उत्थितः = प्रवृत्तः; वृद्धिंगतः, अस्मात् एतस्मात् राक्षसात्, घटोत्कचादित्यर्थः । मोक्तुं = मोचयितुं, इह = अस्मिन् वनस्थाने, आयातः = समागत इति प्रतीयते ।

**समास-व्याख्या**- पाण्डवमध्यमः - पाण्डवेषु मध्यमः (स० त०) इति पाण्डवमध्यमः । संप्रोक्ते - सम्+ प्र वच् + क्तः, सप्तम्येकवचने रूपम् । मोक्तुम् - मुच् + तुमुन्, उत्थितः - उत् + स्था + क्तः ।

---

(प्रविश्य)

मध्यमः-

**अस्यामाचम्य पद्मिन्यां परलोकेषु दुर्लभम् ।**

**आत्मनैवात्मनो दत्तं पद्मपत्रोज्ज्वलं जलम् ॥ ३१ ॥**

---

**अन्वयः** - अस्यां पद्मिन्यां परलोकेषु दुर्लभं पद्मपत्रोज्ज्वलं जलं आचम्य आत्मनैव आत्मनः (श्राद्धनिमित्तकतर्पणं) दत्तम् ।। ३१ ।।

**शब्दार्थः** - अस्यां - एतस्याम्, पद्मिन्यां – कमलिन्याम्, परलोकेषु - स्वर्गलोकेषु, दुर्लभः = अलभ्यः,पद्मपत्रोज्ज्वलं – कमलदलसमानमुज्वलम्, जलं-अम्बुः, आचम्य – आचमनं कृत्वा, आत्मनैव - स्वयमेव, आत्मनः- स्वस्य. दत्तं- दत्तवान्।

**व्याख्या** - अस्यां - एतस्यां, अग्रवर्तिन्यां; पद्मिन्यां कमलतडागे; कमलसरस्यां वा; 'पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः' इत्यमरः । परलोकेषु =पितृलोकेषु, स्वर्गलोकेषु वा; दुर्लभं दुःखेन लभ्यं, अलभ्यं

वा; पद्मपत्रोज्ज्वलं =कमलपत्रम् इव, उज्ज्वलं निर्मलं, जलं उदकं, पानीयं वा; 'आपः जलम् ।उदकंपानीयनीर..' इत्यमरः । आचम्य आचमनं कृत्वा (पीपासाशान्त्यर्थं) पीत्वा वा; आत्मनैव निःसन्तानेन मया स्वेनैव; आत्मनः = आत्मार्थं, आत्मकल्याणार्थं वा, (जलतर्पणं) दत्तम् = प्रदत्तं । यथा-बौद्धायनगृह्यसूत्रे कथितम्- 'जीवेन्नेवात्मनः श्राद्धं कुर्यादन्येषु सत्स्वपि ।' इति । एतस्मात् स मध्यमनामकः ब्राह्मणपुत्रः स्वीयजीवितश्राद्धं निष्पादितवान् ।

**समासः** - पद्मिन्यां- पद्मानि ( = कमलानि) सन्ति अस्यामिति पद्मिनी, तस्यां पद्मिन्यां, पद्मपत्रोज्ज्वलं - पद्मपत्रम् इव उज्ज्वलं इति पद्म- पत्रोज्ज्वलं, 'उपमानानि सामान्यवचनैः' इति कर्मधारयसमासः । दुर्लभम् - दुःखेन लभ्यं ( = प्राप्यं) इति दुर्लभम् ।

---

(उपगम्य) भोः पुरुष! प्राप्तोऽस्मि ।

घटोकचः - भवानिदानीं खल्वसि मध्यमः । मध्यम ! इत इतः ।

वृद्धः- (भीमसेनमुपगम्य) भो मध्यम ! परित्रायस्व ब्राह्मणकुलम् ।

भीमसेनः- न भेतव्यम्, न भेतव्यम् । मध्यमोऽहमभिवादये ।

वृद्धः - वायुरिव दीर्घायुर्भव ।

भीमसेनः- अनुगृहीतोऽस्मि । कुतो भयमार्यस्य ।

---

**व्याख्या** - भवान् त्वम्, इदानीं अस्मिन् क्षणे, खलु वस्तुतः, निश्चित- मेव; जिज्ञासायामर्थे अत्र 'खलु' शब्दः वर्तते; 'निषेधवाक्यालंकार जिज्ञासाऽनुनये खलु' इत्यमरः । परित्रायस्व रक्ष, अभिवादये = नमामि ।

---

**वृद्धः** - श्रूयताम् । अहं खलु कुरुराजेन युधिष्ठिरेणाधिष्ठितपूर्वे कुरु- जाङ्गले 'यूपग्रामवास्तव्यो माठरसगोत्रश्च कल्पशाखाध्वर्युः केशवदासो नाम ब्राह्मणः । तस्य ममोत्तरस्यां दिशि उद्यामकग्रामवासी मातुलः कौशिकसगोत्रो यज्ञबन्धुर्नामास्ति । तस्य पुत्रोपनयनार्थं सकलत्रोऽस्मि प्रस्थितः ।

**व्याख्या** - कुरुराजेन = कुरुवंशनृपतिना, युधिष्ठिरेण, धर्मराजेन, पाण्डोर्ज्येष्ट- पुत्रेण वा, अधिष्ठितपूर्वे- पूर्वं अधिष्ठितं (शासितं, स्थापितं वा) इति अधिष्ठित- पूर्वं, तस्मिन्, कुरुजाङ्गले-कुरुक्षेत्रे, कुरुक्षेत्रस्य प्राचीन नाम 'कुरुजाङ्गलम्' अस्ति । यूपग्रामवास्तव्यः = यूपग्रामनिवासी; माठरसगोत्रश्च = माठरस्य सगोत्रश्च = दायादश्च, सगोत्री इत्यर्थः, 'गोतिया' इति भाषायां । कल्पशाखाध्वर्युः = कल्प- शाखायाः अध्वर्युः = अध्वरं युनक्ति इति अध्वर्युः पुरोहितः, अर्थात् कल्पशाखा- पुरोहितः, केशवदासोनाम ब्राह्मणः = 'केशवदास' इति नामकः विप्रः (अस्मि) । तस्य = पूर्वोक्तस्य, मम ग्रामस्य इत्यर्थः; उत्तरस्यां = उदिच्यां, दिशि = दिग्भागे, उद्यामकग्रामवासी = उद्यामकग्रामस्थः, मातुलः = मातु र्भ्राता, 'मामा' इति भाषायां; 'मातुर्भ्राता तु मातुलः' - इत्यमरः । कौशिकसगोत्रः = कौशिकगोत्रो- त्पन्नः, उपनयनार्थं = यज्ञोपवीतसंस्कारकर्मणि सम्मिलितुमित्यर्थः । सकलत्रः - कलत्रेण सह वर्तते इति सकलत्रः = पत्नीसहितः, प्रस्थितः प्रस्थानं कृतोऽस्मि ( अहमितिशेषः) ।

---

भीमसेनः- अरिष्टोऽस्तु पन्थाः । ततस्ततः ।

वृद्धः- ततो मामेष हि,

**सजलजलदगात्रः पद्मपत्रायताक्षो मृगपतिगतिलीलो राक्षसः प्रोग्रदृंष्ट्रः ।**

**जगति विगतशङ्कस्त्वद्विधानां समक्षं ससुतपरिजनं भो ! हन्तुकामोऽभ्युपैति ॥ ३२ ॥**

---

**व्याख्या**- अरिष्टः अविद्यमानं रिष्टं यत्र स (बहु० स०) अरिष्टः शुभः; 'अरिष्टे तु शुभाशुभे' इत्यमरः । पन्थाः मार्गः, अस्तु = भवतु ।

**अन्वयः** - भो ! सजलदगात्रः, पद्मपत्रायताक्षः, मृगपतिगतिलीलः, प्रोग्र- दंष्ट्रः, जगति विगतशङ्कः, (अयं) राक्षसः, त्वद्विधानां समक्षं ससुतपरिजनं (मां) हन्तुकामः अभ्युपैति ।॥ ३२ ॥

**शब्दार्थः** - भो ! - हे भद्र !, सजलदगात्रः- मेघशरीरः, पद्मपत्रायताक्षः = कमलदलवत् आयताख्य विशाललोचनः, मृगपतिगतिलीलः – सिंहसदृशविलाशगतिः, प्रोग्रदंष्ट्रः- समुन्नतदन्तपङ्क्तयः, जगति –

भूतले, विगतशङ्क- शङ्कारहितः, अयं – एषः, राक्षसः - दैत्यः, त्वद्विधानां – त्वत्सदृसबलवताम्, समक्षः- सन्मुखम्, ससुतपरिजनं - स्त्रीपुत्रसहितम्, हन्तुकामः – वधेच्छुकः, अभ्युपैति - अभ्युपगच्छति।

**व्याख्या**- सजलदगात्रः = जलयुक्तमेघशरीरः, जलयुक्तमेघः श्यामवर्णो भवति, अतः श्यामवर्णशरीरो वा; 'गात्रं वपुः संहननं शरीरं वर्षा विग्रहः' इत्यमरः । पद्मपत्रायताक्षः = कमलदलवत् विशाललोचनः, मृगपतिगतिलीलः = सिंहसदृशविलास पूर्णगमनः, प्रोग्रदंष्ट्रः- समुन्नतबहिर्भूतदन्तः, जगति लोके, भुवने, 'जगती लोको विष्टपं भुवनं जगत्' इत्यमरः । विगतशङ्कः शङ्कारहितः, निर्भयः, (अर्थ) राक्षसः = मांसरक्तभचकः, क्रव्यादः, 'राक्षसः कौणपः क्रव्या- ध्क्रव्यादोस्रप आशरः' इत्यमरः । त्वद्विधानां त्वत्सदृशबलवतों, समक्षं संमुखं, ससुतपरिजनं = पुत्रपत्नीसहितं; अत्र 'परिजन' पदेन पत्नी परामृश्यते कविना ।(मां वृद्धङ्ब्राह्मणमितिशेषः) हन्तुकामः = वधेच्छुकः, अभ्युपैति अभ्युपगच्छति, सनिकटमायाति वा ।।

**समासः** - सजलजलदगात्रः - जलेन सह (वर्तते) सजलः, जलं ददातीति जलदः (= मेघः); सजलश्वासौ जलदः इति सजलजलदः, तस्य गात्रम् इव गात्रं ( = देहं) यस्य सः (उपमा गर्भित बहु० स० ) । पद्मपत्रायताचः - पद्मपत्रे इव आयते ( दीर्घ) अक्षिणी (नयने) यस्य सः ( उप०-बहु ० स०), मृगपतिगतिलीलः - मृगाणां पतिः मृगपतिः (ष० स०), तस्य गतिः सृगपतिगतिः, तस्या छीला इव लीला ( = विलासः) यस्य सः ( उपमा गर्भित बहु० स० ) । प्रोग्रदंष्ट्रः- प्रोग्रा प्रकर्षेण उग्रा प्रोग्रा, अत्युन्नता इत्यर्थः, दंष्ट्रा ( = दन्तः) यस्य सः (बहु० स० ) । विगतशङ्कः - विगता (= विनष्टा) शङ्का यस्य सः (बहु० स०), त्वद्विधानां तव विधा इव विधा ( = प्रकारः = कार्यप्रणालिर्वा) येषां (बहु० स०); समक्षम् - अक्ष्णः (अचणोर्वा = नेत्रयोः) समं समत्वम् (अव्ययीभावसमासः) ।

---

भीमः - एवम् ! अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः । भवतु निग्रहिष्यामि तावदेनम् । भोः पुरुष ! तिष्ठ तिष्ठ ।

घटोत्कचः - एष स्थितोऽस्मि ।

**व्याख्या** - ब्राह्मणजनस्य ब्राह्मणलोकस्य, मार्गविघ्नः मार्गेषु विघ्नः (= वाधा) मार्गविघ्नः । निग्रहष्यामि = प्रताडयिष्यामि; प्रतिरोधोपायं विधाष्यामि, अथवा दण्डयिष्यामि इत्यर्थः । तिष्ठ तिष्ठ पदात्पदमपि न गन्तव्यमित्यर्थः ।

भीमः - किमर्थ ब्राह्मणजनमपराध्यसि ।

**पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च ।**

**वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिवोत्थितः ॥ ३३ ॥**

**अन्वयः**- (भोः पुरुष !) पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च (अस्य) वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिव (राहुः इव) उत्थितः (अस्ति) ॥ ३३ ॥

**शब्दार्थः**- भो पुरुष ! – हे सज्जनः!, पुत्रनक्षत्रकीर्णस्य – पुत्रतारागणपरिवेष्टितस्य, युक्तः- संयुक्तः, पत्नीकान्तप्रभस्य च – भार्यामनोरमप्रकाशस्य, वृद्धस्य – जराग्रस्तस्य, विप्रचन्द्रस्य = ब्राह्मणरूपीचन्द्रस्य, भवान् – घटोत्कचः इति भावः, राहुरिव - राहुग्रह इव, उत्थितः – उत्थानं कृतः।

व्याख्या-पुत्रनक्षत्रकीर्णस्य = सुततारागणपरिवेष्टितस्य, पत्नीकान्त प्रभस्य च = भार्यामनोरमप्रकाशस्य, वृद्धस्य = स्थविरस्य, जीर्णदेहस्य इत्यर्थः, 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि' इत्यमरः । विप्रचन्द्रस्य = ब्राह्मणचन्द- मसः; ब्राह्मणपूर्णेन्दोरित्यर्थः; भवान् घटोत्कचः; राहुः इव = विधुन्तुद इव; 'तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः' इत्यमरः । उस्थितः = उत्थानं कृतः, हन्तुं तत्पर इत्यर्थः । अर्थात् यथा सिंहिकासुतः राहुः पर्वणि पूर्णचद्रं ग्रसति (उत्पीडयति ) तथैव त्वं एनं वृद्धं ब्राह्मणं हन्तुं उद्यतो असि इतिभावः ।

**समासः** - पुत्र नक्षत्रकीर्णस्य - पुत्राः नक्षत्राणि इव (उपमितसमासः) अथवा पुत्रा एव नक्षत्राणि (रूपकभावे) इति पुत्रनक्षत्राणि, तैः कीर्णः = (विस्तृतः) पुत्रनक्षत्रकीर्णः, तस्य; पत्नीकान्तप्रभस्य - पत्नी कान्तप्रभा इव यस्य सः (बहु० स०) अथवा पत्नी एव कान्ता प्रभा ( छविः) यस्य सः, तस्य; विप्रचन्द्रस्य

- विप्र एव चन्द्रः, अथवा विप्रः चन्द्र इव (उपमितसमासः) इति विप्रचन्द्रः, तस्य । उत्स्थितः - उद्+ स्था + क्तः प्रत्यये कृते सति ।

---

घटोत्कचः - अथ किम्? राहुरेव ।

भीमः आः,

**निवृत्तव्यवहारोऽयं सदारस्तनयैः सह ।**

**सर्वापराधेऽवध्यत्वान्मुच्यतां द्विजसत्तमः ॥ ३४ ॥**

---

**व्याख्या** - राहुरेव = अर्थात् न खलु राहु इव, अपितु राहु एव ।

अन्वयः - निवृत्तव्यवहारः, सर्वापराधे अवध्यत्वात्, सदारः तनयैः सह अयं द्विजसत्तमः मुच्यतां (श्वयेतिशेषः) ॥ ३४ ॥

**शब्दार्थः** - निवृत्तव्यवहारः - लौकिकव्यवहारात् निवृत्तः, सर्वापराधे - कृतापराधे, सदारः- सपत्नीकः, तनयैः सह-पुत्रैः सहितः, अयं- एषः, द्विजसत्तमः - श्रेष्ठब्रह्मणः, मुच्यतां- त्यज्यताम्।

**व्याख्या** - निवृत्तव्यवहारः- मुक्तव्यवहारः; परित्यक्तः सर्वसामान्यलौकिक- कार्यकलापः, मोत्तमात्रसाधकः, ब्रह्मनिष्ठो वा इत्यर्थः, सर्वापराधे कृतापराधे सति, अवध्यत्वात् = ब्राह्मणहननायोग्यत्वात् ब्राह्मणवधपापजनकत्वाच्च यथा मनुना उक्तं -

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् । राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ।।

न ब्राह्मणवधाद् भूयानधर्मो विद्यते भुवि । तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेन् ।।

मनुस्मृतिः-८।३८०-३८१

सदारः = सपत्नीकः, 'पत्नी भार्यादाराः कुटुम्विनी' इत्यमरः । तनयैः सह = पुत्रैः सह, अयं = केशवदेवनामा पूर्वोक्तः, द्विजसत्तमः = ब्राह्मणो- तमः, ब्राह्मणकुलश्रेष्ठः, 'श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने' इत्यमरः । मुच्यताम् = त्यज्यताम्; सर्वतोभावेन त्वयेतिशेषः ।

**समासः** - निवृत्तव्यवहारः - व्यवहारात् निवृत्तः (प० तत्पु० समासः) अथवा निवृत्ता (= दूरीभूताः) व्यवहाराः यस्य सः (बहुव्रीहिसमासः); सर्वापराधे- सर्वश्चासौ अपराधः इति सर्वापराधः (कर्म० स०), तस्मिन्; अवध्यत्वात्-न वध्यत्वम् अवध्यत्वं, तस्मात्; सदारः- दारैः सह, सदारः (तृ० स०), द्विजसत्तमः - द्विजेषु सत्तमः (= श्रेष्ठः ) ( स० त० स० ) द्विजसत्तमः ।

---

घटोत्कचः - न मुच्यते ।

भीमः - ( आत्मगतम् ) भोः ! कस्य पुत्रेणानेन भवितव्यम् ।

**भ्रातॄणां मम सर्वेषां कोऽयं भो ! गुणतस्करः ।**

**दृष्ट्वैतद्बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम् ॥ ३५ ॥**

---

**अन्वयः** - भो ! मम सर्वेषां भ्रातॄणां गुणतस्करः, अयं कः (अस्ति )? एतद् बालशौण्डीर्यं दृष्ट्वा सौभद्रस्य अहं स्मरामि ॥ ३५ ॥

**शब्दार्थः** - भो ! - अरे !, मम – मदीयम्, सर्वेषां - समस्तानाम्, भातृणां - सोदराणाम्, गुणतस्करः – सौर्यादिगुणापहर्ता, बालशौण्डीर्यं – बालजदर्पम्, दृष्ट्वा - अवलोक्य, सौभद्रस्य – अभिमन्योः, स्मरामि – स्मरणं करोमि।

**व्याख्या**-भो ! = हे, सम्बोधनार्थकोऽयं शब्दः, 'अङ्ग-हे-भो' - इत्यमरः । मम = मे, भीमसेनस्य इत्यर्थः; सर्वेषां = निखिलानां, भातृणां = बन्धूनां, युधिष्ठिरप्रभृतीनामिति भावः; गुणतस्करः = शौर्यादिगुणापहर्ता, अयं = एष पुरुषः, कः किं नामधेयः ? (अस्तीति) । एतत् = एवं विधं, बालशौण्डीर्यं = बालजदर्पं, दृष्ट्वा = अवलोक्य, अहं भीमः, सौभद्रस्य = सुभद्रासुतस्य, अभिमन्युर्वा, स्मरामि = स्मृतिं करोमि; यथा अर्जुनपुत्रस्य अभिमन्योः औद्धश्यम् अस्ति तथैव अस्यापि कुमारस्य, गर्वभावः प्रत्यत्तो भवतीति भावः ।

**समासः**- गुणतस्करः - गुणानां तस्करः (= चौरः ) ( ष० त० स० ) इति गुणतस्करः । बालगौण्डीर्यं - बालस्य शौण्डीर्यं (दर्पं) (ष० त० स० ) बालशौण्डीर्यं । सौभद्रस्य - सुभद्राया अपथ्यं पुमान् सौभद्रः,

तस्य । यहाँ पर 'अधीगर्थदयेशां कर्मणि' इस पाणिनि सूत्र से 'सौभद्रस्य' में कर्म में षष्ठी विभक्ति हुई है । 'स्मरामि' क्रिया का यह कर्म है ।

---

(प्रकाशम्) भोः पुरुष! मुच्यताम् ।

घटोत्कचः - न मुच्यते ।

**मुच्यतामिति विस्त्रब्धं ब्रवीति यदि मे पिता ।**

**न मुच्यते तथा ह्येषः गृहीतो मातुराज्ञया ॥ ३६ ॥**

---

**अन्वयः**-- यदि मे पिता (अपि) विस्त्रब्धं मुच्यताम् इति ब्रवीति न मुच्यते तथा हि एषः मातुः आज्ञया गृहीतः (मयेतिशेषः) ॥ ३६ ॥

**शब्दार्थः** - यदि = चेत्, पिता - जनकः, विस्त्रब्धं - आत्मविश्वासपूर्वकम्, मुच्यताम् – त्यज्यताम्, ब्रवीति – कथयति, एषः- ब्राह्मणकुमारः, न- नहि, मुच्यते – परित्यज्यते, हि – यतः, मातुः – अम्बायाः आदेशेन, गृहीतः – ग्रहणं कृतम्।

**व्याख्या** - यदि = चेत् 'पक्षान्तरे चेद्यदि च' पिता = जन्मदाता, (अपि), विस्त्रब्धं विश्वासयुक्तं; इत्यमरः । मेसे = मम, आत्मविश्वासपूर्वकं

यथा स्यात् तथा इत्यर्थः अभिज्ञानशाकुन्तले 'विश्रब्धं' इति प्रयोगः वर्तते यथा- 'विश्रब्धैः क्रियतां वराहपतिभिः' (२।६); मुच्यतां = व्यज्यताम्, इति = एवं, ब्रवीति = वति, तथा तथापि न नहि, मुच्यते = परित्यज्यते, हिं = यतः, एषः = ब्राह्मणकुमारः, मध्यमनामक इत्यर्थः, मातुः अम्बायाः, 'अम्बा माता' इत्यमरः, आज्ञया आदेशेन; गृहीतः ग्रहणं कृतः (मयेतिशेषः) ।

---

भीमः - ( आत्मगतम्) कथं मातुराज्ञेति । अहो गुरुशुश्रूषुः खल्वयं तपस्वी ।

**माता किल मनुष्याणां देवतानां च दैवतम् ।**

**मातुराज्ञां पुरस्कृत्य वयमेतां दशां गतः ॥ ३७ ॥**

---

**व्याख्या** - गुरुशुश्रूषुः- गुरूणां = गुरुजनानां, पूज्यानां वाः शुश्रूषुः = सेवापरायणः, गुरुभक्त इत्यर्थः । शुश्रूषामिच्छति इति शुश्रूषुः 'सनासंसभिक्ष उ' इति पाणनिसूत्रेण उप्रत्यये कृते निष्पद्यते ।

**अन्वयः** -- मनुष्याणां देवतानां च (कृते) दैवतम् माता किल (अस्ति); (यतः) मातुः आज्ञां पुरस्कृत्य वयम् एतां दशां गताः (स्मः) ॥ ३७ ॥

**शब्दार्थः** - मनुष्याणां – मनवानाम्, देवतानां च – देवनां च, दैवतम् - देवभावरूपम्, माता – अम्बा, किल – निश्चियः, मातुः - अम्बायाः, आज्ञां- आदेशम्, पुरस्कृत्य = अग्रे कृत्वा, वयं- पाण्डवपुत्राः इति भावः, एतां – एवं भूताम्, दशाम् = अवस्थाम्, गताः- लब्धाः इति।

**व्याख्या**- मनुष्याणां मानवानां, (कृते), 'मनुष्या मानवा नरा' इत्यमरः । देवतानां = देवयोनीनां, इन्द्रादिदेवतानां वा, च = अपि; दैवतम् = देवता, 'दैवतम्' नपुंसके, 'देवता' स्त्रियामस्ति । यथा- 'अमरा निर्जरा... वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्' - इत्यमरः । पूज्यतमा, माता = जननी, अम्बा, किल = निश्चयेन, नूनमित्यर्थः । अर्थात् माता स्वर्गादपि श्रेष्ठतमा अस्ति अतः सर्वतोभावेन सा देवता अस्ति । वाल्मीकिरामायणे उक्तम् -

अपि स्वर्णमयी लवङ्का न मे लक्ष्मण रोचते । जननी जन्मभूमिश्च स्वर्गादपि गरियसी ॥

( यतः) मातुः = जनन्याः, आज्ञां, पुरस्कृत्य पुरः = अग्रेकृत्वा, शिरसि धार्य, स्वीकृत्य वा; वयं युधिष्ठिरादयः, पाण्डुपुत्राः, एतां = एवंभूतां, वनवासरूपां, दशां = अवस्थां, विपदां, गताः = लब्धाः (स्मः) ।

---

(प्रकाशम्) पुरुष ! प्रष्टव्यं खलु तावदस्ति ।

घटोत्कचः- ब्रूहि ब्रूहि, शीघ्रम् ।

भीमः - का नाम भवतो माता ?

घटोत्कचः - श्रूयतां, हिडिम्बा नाम राक्षसी,

**कौरव्यकुलदीपेन पाण्डवेन महात्मना ।**

**सनाथा या महाभागा पूर्णेन द्यौरिवेन्दुना ॥ ३८ ॥**

---

**अन्वयः** - या (हिडिम्बा) महाभागा कौरव्यकुलदीपेन महात्मना पाण्ड- वेन पूर्णेन इन्दुना द्यौरिव सनाथा (अस्ति ) ।। ३८ ।।

**शब्दार्थः** - या – हिडिम्बा इति भावः, महाभागा - सौभाग्यवती, कौरव्यकुलदीपकेन - कुरुवंशदीपकेन, महात्मना - उदारमना, पाण्डवेन – पाणण्डुपुत्रेण भीमेन, पूर्णेन- पूर्णकलायुक्तेन, इन्दुना- चन्द्रमसा, द्यौः इव - आकाश इव, सनाथाः - पतियुक्ता।

व्याख्या-या = हिडिम्बा नाम्नी मम माता; महाभागा = सौभाग्यवती, कौरव्य कुलदीपकेन = कुरुवंशदीपकेन, महात्मना = उदारमना, पाण्डवे = पाण्डु- पुत्रेण, भीमेन, इत्यर्थः; पूर्णेन पूर्णकलायुक्तेन, इन्दुना = चन्द्रेण, अर्थात् पूर्ण- चन्द्रेण; द्यौरिव आकाशम् इव, 'द्यौ दिवौ द्वे स्त्रियाम्पुंस्याकाशविहायसी ।' इत्यमरः । सनाथा = पतियुक्ता (अस्ति; अर्थात् गान्धर्वविवाहेन हिडिम्बा राक्षसी आर्यभीमस्य पत्नी संजाता इति महाभारती कथा अनुसंधेया ।

**समासः** - कौरव्यकुलदीपेन - कुरोः अपत्यं पुमान् कौरव्यः, तस्य कुलं कौरव्य कुलं, कौरव्यकुलस्य दीपः (ष० त० स०) कौरव्यकुलदीपः, तेन । महात्मना - महान् आत्मा यस्य स महात्मा (बहु० स०), तेन पाण्डवेन - पाण्डोः अपत्यं पुमान् पाण्डवः, तेन । महाभागा - महान् भागो यस्या (बहु० स०) सा; सनाथा - नाथेन ( = स्वामिना) सह वर्तते या सा सनाथा (बहु० स०) ।

---

भीमः- (सहर्षमात्मगतम्) एवं हिडिम्बायाः पुत्रोऽयम् । सदृशो ह्यस्य गर्वः ।

**रूपं सत्त्वं बलं चैव पितृभिः सदृशं बहु ।**

**प्रजासु बीतकारुण्यं मनश्चैवास्य कीदृशम् ॥ ३९ ॥**

---

**व्याख्या**-हिडिम्बायाः मम गान्धर्वभावमवाप्ताया पत्न्याः सदृशः = समानः अनुरूपो वा; गर्वः = अभिमानः ।

**अन्वयः** - अस्य रूपं सत्त्वं बलं च बहु पितृभिः सदृशम् स्व (अस्ति ); ( परन्तु ) प्रजासु वीतकारुण्यं मनश्च कीदृशमेव ? (भूतमितिशेषः) ॥ ३९ ॥

**शब्दार्थः** - अस्य - घटोत्कचस्य, रूपं- आकृतिः, सत्वम् - पराक्रमम्, बलं - सामर्थ्यम्, च - अपि, बहुताय- अधिकम्, पितृभिः - जनकैः, सदृशं - समानम्, प्रजासु – नागरिकेषु, वीतकारूण्यं - निष्कारुण्यम्, मनश्च-मानशं च, , कीदृशमेव- कथमिव।

**व्याख्या** - अस्य = बालस्य, हिडिम्बापुत्रस्य इत्यर्थः, रूपं = आकृतिः, सुन्दरता वा, सत्त्वं अति पराक्रमं, 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' - इत्यमरः, अत्र 'व्यवसाय' पदेन 'अधिकपराक्रम' इत्यर्थौ आयाति । बलं = सारं, सामर्थ्य वा, च = अपि, बहु = बहुतायतं, पितृभिः = जनकैः, अस्माभिः भीमैरित्यर्थः, सदृशं समानं, (परन्तु) प्रजासु= जनेषु, सर्व- सामान्येषु अथवा सन्ततिषु वा, 'प्रजा स्यात् सन्ततौ जने' इत्यमरः । वीतः कारुण्यं = निष्कारुण्यं, निर्दयभावं वा, मनसः विशेषणपदमस्ति । मनश्च = मानसं; च 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । कीदृशं = केन रूपेण, कथं वा ? (संजातमिति शेषः); अर्थात् क्षत्रिय एव कठोरहृदयः भवति अत अयं क्षत्रियः एवमनुमिनोमीतिभावः ।

**समासः** - वीतकारुण्यं - वीतं ( = गतं) कारुण्यं यस्मात् (बहु०स० ) । छन्दः - यह श्लोक भी अनुष्टुप् छन्द में है।

---

(प्रकाशम्) भोः पुरुष ! मुच्यताम् ।

घटोत्कचः - न मुच्यते ।

भीमः - भो ब्राह्मण ! गृह्यतां तव पुत्रः । वयमेनमनुगमिष्यामः ।

द्वितीयः - मा मा भवानेवम् ।

**त्यक्ताः प्रागेव मे प्राणा गुरुप्राणेष्वपेक्षया ।**

**युवा रूपगुणोपेतो भवांस्तिष्ठतु भूतले ॥ ४० ॥**

---

**अन्वयः**- गुरुप्राणेषु अपेक्षया मे प्राणाः प्रागेव त्यक्ताः (अत एव ) । रूपगुणोपेतः युवा भवान् (अस्मिन् ) भूतले तिष्ठतु ॥ ४० ॥

**शब्दार्थः** - गुरुप्राणेषु – गुरुजनजीवनेषु, अपेक्षया - हेतुना, मे-मदीयम्, प्राणाः – जीवितम्, प्रागेव-पूर्वमेव, त्यक्ताः – समर्पिताः, रूपगुणोपेतः – रूपगुणालङ्कृतः, युवा – युवकः, अस्मिन् – एतस्मिन्, भूतले – संसारे, तिष्ठतु – धारयतु।

**व्याख्या** - गुरुप्राणेषु = गुरुजनजीवनेषु, अपेक्षया = हेतुना, अर्थात् पूज्यजनप्राणरक्षणार्थं; मे = मम, ब्राह्मणमध्यमपुत्रस्य, प्राणाः = असवः, 'पुंसि भूम्न्यसवः प्राणाश्चैवं' इत्यमरः । प्रागेव = भवदागमनात् पूर्वमेव, अस्य पुरुषस्य आगमनान्तरमित्यर्थः । त्यक्ताः = त्याजिताः एतत्कृते समर्पिताः; अत एव रूपगुणोपेतः = रूपगुणालंकृतः, युवा = युवकः, यौवनभावसम्पन्नः, भवान् = श्रीमान्, (अस्मिन्), भूतले = भूमौ, संसारे; तिष्ठतु = स्थितिं विधातु; चिरजीवनं धारयतु इत्यर्थः ।

**समासः**- रूपगुणोपेतः - रूपञ्च, गुणश्च इति रूपगुणौ ( द्वन्द्वसमासः), ताभ्यां रूपगुणाभ्याम् उपेतः (= संयुक्तः, विभूषितः, तत्पुरुषसमास) इति रूप- गुणोपेतः । गुरुप्राणेषु - गुरूणां = तातमात्रादीनां प्राणाः गुरुप्राणाः (ष० स०), तेषु गुरुप्राणेषु ।

---

भीमः - आर्य ! मा मैवम् । क्षत्रियकुलोत्पन्नोऽहम् । पूज्यतमाः खलु ब्राह्मणाः । तस्माच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि ।

घटोत्कचः - एवं क्षत्रियोऽयं, तेनास्य दर्पः । भवतु, इममेव हत्वा नेष्यामि । अथ केनायं वारितः ।

भीमः - मया ।

घटोत्कचः - किं त्वया ?

भीमः - अथ किम् ?

घटोत्कचः - तेन हि भवानेवागच्छतु ।

भीमः- एवमतिबलवीर्यान्नानुगच्छामि । यदि ते शक्तिरस्ति बला- त्कारेण मां नय ।

घटोत्कचः - किं मां प्रत्यभिजानीते भवान् ।

---

**व्याख्या** - विनिमातुं = स्वप्राणदानेन सह विनिमयं कर्तुमित्यर्थः दर्पः = गर्वः, अभिमानः, वारितः = निवारितः, अवरोधितः । अतिबलवीर्यात् = अतिशक्तिपराक्रमात्; बलं च वीर्यं च इति बलवीर्ये, अतिशयिते बल- वीर्ये यस्य स (बहु० स० ) अतिबलवीर्यः, बलात्कारेण = सामर्थ्येन, शक्तिः = प्रभुत्वम् । अर्थात् त्वं आत्मानं बहुबलशालिनम् अवगच्छसि एतस्मात् कारणात् तव पृष्ठतः न गमिष्यामि, त्वयि यदि अतिप्रभुत्वमस्ति तर्हि मां बलादाकृष्य तत्र नय इति भावः । प्रत्यभिजानीते परिचीयते । प्रति + अभि + ज्ञा- अवबोधने धातोः लटि प्रथमपुरुषैकवचने रूपमस्ति शेषः।

---

भीमः - मत्पुत्र इति जाने ।

घटोत्कचः - कथं कथं तव पुत्रोऽहम् ।

भीमः - कथं रुष्यात । मर्षयतु मर्षयतु भवान् । सर्वाः प्रजाः क्षत्रि- याणां पुत्रशब्देनाभिधीयन्ते । अत एव मयाभिहितम् ।

घटोत्कचः - भीतानामायुधं गृहीतम्

---

**व्याख्या** - रुष्यति = रोषं विद्धाति, क्रुध्यति । मर्षयतु = चमतु, शान्ति नयतु । सर्वाः = समस्ताः, प्रजाः प्रज्ञावर्गाः, क्षत्रियाणां अस्माकं क्षात्रधर्माणां, पुत्रशब्देन अर्थात् मत्पुत्रसमाना सकला प्रजावर्गा, अभिधीयन्ते = कथ्यन्ते जनैरिति शेषः एवं अवगच्छ, प्रजायां पुत्रे च न कश्चित् भेद इति भावः, 'प्रजा स्यात् सन्ततौ धने' इत्यमरः । विधात्रा प्रजारक्षणार्थं मादृशाः क्षत्रियः सर्जितः एवं जानीहि । अतः अभिहितम् कथितम् । अभिज्ञानशाकुन्तलेऽपि निम्नोक्त- रूपेण वाक्यं लभ्यते - प्रजाः प्रजाः स्वा इव तन्त्रयित्वा । - शाकु० ५-३

भीतानां = भयत्रस्तानां, दुर्बलानामित्यर्थः । आयुधं = शस्त्रं, गृहीतम् = अवलम्बितम् ।

---

भीमः -

**शपामि सत्येन भयं न जाने, ज्ञातुं तदिच्छामि भवत्समीपे ।**

**किंरूपमेतद्वद भद्र तस्य, गुणागुणतः सदृशं प्रपत्स्ये ॥४१॥**

---

**अन्वयः**- हे भद्र (अहं) सत्येन शपामि, भयं न जाने । तत् भवत् समीपे ज्ञातुम् इच्छामि एतद् किंरूपम् (अस्ति) वद, तस्य गुणागुणज्ञः (स्वं) सदृशं प्रपत्स्ये ॥ ४१ ॥

**शब्दार्थ** - हे भद्र !- हे कल्याणपुरुष ! , सत्येन - सत्यभावेन, शपाम- प्रतिज्ञां करोमि, भयं – भीतिम्, न - नहि, जाने- जानामि, तत्- भयम्, भवत्-तव, इच्छामि- वाञ्छामि, समीपे – निकटे, ज्ञातुं-परिचितुम्, एतद् -इदम्, वद – कथय, किंरूपं – कीदृशं रूपम्, अस्ति- भवति, तस्य- एतस्य, गुणागुणज्ञः- गुणदोषज्ञाता, सदृशम्-समम्, प्रपत्स्ये - लभसे ।

**व्याख्या**- हे भद्र = हे कल्याणपुरुष ! सत्येन = सत्यभावेन, सम्यग् रूपेण; 'सत्यं तथ्यमृतं सम्यग्' - इत्यमरः । शपामि = प्रतिज्ञां सौगन्धं करोमि; भाषायां 'कसम खाना' इत्यर्थो भवति । भयं भीतिं, न = नहि, जाने = जानामि, तत् भयं, भवत् = त्वत् तव वाः समीपे = सन्नि- कटे, जातुं - परिचितुं, इच्छामि वांछामि, अभिलषामि इत्यर्थः एतद् = इदम्, किं रूपं = किमाकारं, कीदृशं किं स्वरूपं वाः (अस्ति भवति वा )। बालचरिते (३।८) यथा- 'किमेतद् भो भयं नाम भवतोऽद्य मया श्रुतम्' इति तुलनीयम् । गुणागुणज्ञः गुणदोषज्ञाता, (त्वं) वद ब्रहि, कथय; सदृशं = सहजं, समानरूपं वा; पञ्चरात्रे (२।३५) यथा 'सहजो मे प्रहरणं भुजौ' इति तुलनीयम् । अतः सदृशं इत्यस्य 'सहजं' अर्थो सङ्गतो भवति । प्रपत्स्ये = लभसे, विवेचयिष्यसि इत्यर्थः ।

**समासः** - भवत्समीपे भवतः समीपे (ष० स०) इति भवत्समीपे । गुणागुणज्ञः गुणश्च अगुणश्च (इन्द्र स०) इति गुणागुणौ, तौ जानाति इति गुणागुणज्ञः । 'जाना तेडः' प्रत्यये सति रूपं सिध्यति ।

---

घटोत्कचः- एष ते भयमुपदिशामि । गृह्यतामायुधम् ।

भीमः - आयुधमिति, गृहीतमेतत् ।

घटोत्कचः कथमिव ।

भीमः -

**काञ्चनस्तम्भसदृशो रिपूणां निग्रहे रतः ।**

**अयं तु दक्षिणो बाहुरायुधं' सहजं मम ॥ ४२ ॥**

---

**व्याख्या** - आयुधम् = शस्त्रम्, अस्त्रं वा, 'आयुधं तु प्रहरणं शस्त्रमस्त्र- मथास्त्रियौ' इत्यमरः ।

**अन्वयः** - रिपुणां निग्रहे रतः काञ्चनस्तम्भसदृशः, अयं दक्षिणः बाहुः मम सहजं आयुधं (अस्ति) ॥ ४२ ॥

**शब्दार्थः** - रिपूणां - शत्रूणाम्, निग्रहे- निरोधे, रतः – अनुरक्तः, काञ्चनस्तम्भसदृशः - स्वर्णस्तम्भसमः, अयं- एषः, तु - किन्तु, दक्षिणः- वामाभिज्ञः, बाहुः- भुजा, मम – भीमस्येति भावः, सहजम् - जन्मडातम्, प्रकृतिप्रदत्त-स्वभाविकम्, आयुधः-शस्त्रम् इति।

**व्याख्या**- रिपूणां = शत्रुणां, अरीणां, द्वेषिणां वा, 'रिपौ वैरिसपत्नारिद्विषद्- द्वेषणदुर्हृद' इत्यमरः । निग्रहे = दमने, निरोधे; 'निग्रहस्तद्विरुद्धः स्थात्' इत्यमरः । रतः अनुरक्तः, तत्परः, तल्लीनः संलग्नो वा । दक्षिणः = वामभित्रः, शस्त्र-अस्त्रप्रक्षेपणे अनुकुलः, काञ्चनस्तम्भसदृशः = स्वर्णस्तम्भसमानः, बाहो- विशेषणपदम्, अयं = एषः, मम भीमस्य, बाहुः भुजः, सहजं जन्मजातं, प्राकृतं, स्वाभाविकं, ईश्वरप्रदत्तं वा, आयुधं अस्टशखं, ( भस्ति) शेषः ।

**समासः**- काञ्चनस्तम्भसदृशः काञ्चनस्य स्तम्भः काक्षणस्तम्भः (ष० स०) तेन सदृशः ( = समानः) इति काञ्चनसदृशः (तृ० स० ) । सहजं - सह जायते इति सहजम् ।

---

घटोत्कचः - इदमुपपन्नं पितुर्मे भीमसेनस्य ।

भीमः- अथ कोऽयं भीमो नाम ?

**विश्वकर्ता शिवः कृष्णः शक्रः शक्तिधरो यमः ।**

**एतेषु कथ्यतां भद्र ! केन ते सदृशः पिता ॥ ४३ ॥**

---

**व्याख्या**--उपपन्नम् सिद्ध, प्रतिपादन; अनुकुल, युक्त । भीमसेनस्य = कुन्तीपुत्रस्य, पाण्डवेषु मध्यमस्य इत्यर्थः ।

**अन्वयः** - विश्वकर्ता, शिवः, कृष्णः, शक्रः, शक्तिधरः, यमः, एतेषु ते पिता केन सदृशः ? हे भद्र ! कथ्यताम् ॥ ७३ ॥

**शब्दार्थः** - विश्वकर्ता - जगतकर्ता, ब्रह्मा- चतुर्मुखः, शिवः - संहारकर्ता, कृष्णः - विष्णु शक्रः- इन्द्रः, शक्तिधरः- कुमारः,कार्तिकेयः, यमः - यमराजः, एतेषु – देवेषु, ते - तव, पिता- जनकः, केन- केन प्रकारेण, सदृशः - समानः हे भद्र ! हे सौम्य ! कथ्यताम् - उच्यताम्।

**व्याख्या** - विश्वकर्ता' जगत्कर्ता; स्त्रष्टा, संसाररचयिता, ब्रह्मा, शिवः = महादेवः, महेश्वरः = सृष्टिसंहारकः, 'शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः' इत्यमरः । कृष्णः = विष्णुः, कृष्णः, 'विष्णुनाराधणः कृष्णो' इत्य- सरः । शक्रः = इन्द्रः, 'इन्द्रोमघवा, पुरन्दरः शक्रः शतमन्युः' इत्यमरः । शक्तिधरः = कुमारः, कार्तिकेयः, 'कर्तिकेयः महासेनः पार्वतीनन्दनः***शक्तिधरः कुमारः' इत्यमरः । यमः यमराजः 'शमनो यमराट् यमः' इत्यमरः । एतेषु = पूर्वोक्तशक्तिसम्पन्नदेवेषु ते तव, पिता = पालकः, जनयिता, जनकः; केन केन महानुभावेन, महापुरुषेण, उक्तदेवविशेषेण वा सदृशः = समानः, तुल्यः (अस्ति); हे भद्र ! हे कल्याण ! कथ्यताम् = उच्यताम् ।

**समासः** - विश्वकर्ता - विश्वस्य कर्ता (ष० स०) विश्वकर्ता । शिवः- ( = कल्याणं-मङ्गलं) शं भावयति इति शिवः; कृष्णः कर्षतीति कृष्णः; शक्ति- धरः-शक्तिं धारयतीति शक्तिधरः । यमः यमयति नियमयति इति यमः । पिता-पातीति पिता ।

---

घटोत्कचः सर्वैः ।

भीमः - धिगनृतमेतत् ।

घटोत्कचः - कथं कथमनृतमित्याह । क्षिपसि मे गुरुम् । भवत्विमं स्थूलं वृक्षमुत्पाटय प्रहामि । (उत्पाट्य प्रहरति ।) कथमनेनापि न शक्यते हन्तुम् । किं नु खलु करिष्ये नु । भवतु, दृष्टम् । एतगिरि- कूटमुत्पाटय प्रहरामि ।

**व्याख्या** - अनृतम् मिथ्या, विपरीतम् । क्षिपसि उपहससि, निन्दसि । गुरुम् = पितरम्, गिरिकूटम् = पर्वतशिखरम् ।

**शैलकूटं मयाक्षिप्तं प्राणानादाय यास्यति ।**

**अन्वयः** - मया आक्षिप्तम् (इदं) शैलकूटं (एतस्य) प्राणान् आदाय यास्यति ।

**शब्दार्थः**- मया - मद्वारा, आक्षिप्तम् -उत्पाट्य प्रक्षिप्तमिति, इदं - एतत, शैलकूटं पर्वतशिखरम्, एतस्य - अस्य, प्राणान् - जीवनान्, आदाय-स्वीकृत्य, यास्यति- गमिष्यति।

**व्याख्या** - मया = हिडिम्बासुतेन घटोत्कचेन इत्यर्थः । आक्षिप्तम् = उत्पाठ्य प्रक्षिप्तम्, (इदं शैलकूटं पर्वतशिखरम् पर्वताः । अचल- शैलशिलोच्चयाः ।।'-अमरकोश (२-३-१) तथैव 'कूटोऽस्त्रिशिखरं शृङ्ग' - इत्यमरः । प्राणान् = जीवनान्, आदाय गृहीत्वा, यास्यति = गमिष्यति, स्थास्यति इति भावः ।

**समासः** - शैलकूटम् = शैलस्य कूटम् शैलकूटम् (१० स०) । आक्षिप्तम् आसमन्तात् चिप्तम् आक्षिप्तम् । यास्यति-या प्रापणे धातोः या + लृट् लकारे प्रथमपुरुषे एकवचने स्य ति कृते सति रूपं सिध्यति ।

भीमः-

**रुष्टोऽपि कुञ्जरो वन्यो न व्याघ्रं धर्षयेद् वने ॥ ४४ ॥**

**अन्वयः** - कुञ्जरः रुष्टः (भूत्वा) अपि वने व्याघ्रं न धर्षयेत् ॥ ४४ ॥

**शब्दार्थः** - वन्यः - अरण्यः, कुञ्जरः - गजः, रुष्टः - कुपितः, अपि – हि, वने- अरण्ये, व्याघ्र- शार्दूलम्, न - नहि, धर्षयेत् - पराजयेत्।

**व्याख्या**- वन्यः = जाङ्गलो, वनवासी; कुञ्जरः = हस्ती, 'दन्ती हस्ती. गजो नागः कुञ्जरो वारणः करी' इत्यमरः । रुष्टः क्रोधितः (भूत्वा) अपि, वने = विपिने, कानने; 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । व्याघ्रं = शार्दूलं, हिंसकपशुं, 'शार्दूलद्वीपिनौ व्याघ्र' इत्यमरः । न नहि, धर्षयेत् = पराजयेत् ।

**समासः** - वन्यः- वने भवः (स० त०) वन्यः 'तत्र भवः' इति पाणिनि- सूत्रेण कृदन्तीय यत् प्रत्यये कृते सति सिध्यति । धर्षयेत् धृष लिङ् + लिष् प्रथमपुरुषैकवचने ।

---

घटोत्कचः - ( प्रहृत्य ) कथमनेनापि न शक्यते हन्तुम् । किं नु खलु करिष्ये । भवतु, दृष्टम् ।

**मन्वहं भीमसेनस्य पुत्रः पौत्रो नभस्वतः । तिष्ठेदानीं सुसन्नद्धो नियुद्धे नास्ति मत्समः ॥ ४५ ।।**

( इत्युभौ नियुद्धं कुरुतः ।)

---

**अन्वयः**- अहं ननु भोमसेनस्य पुत्रः नभस्वतः पौत्रः (स्मि), इदानीं सुसन्नद्धः (श्वं) तिष्ठ, नियुद्धे मत्समः (कोऽपि) नास्ति ।॥ ४५ ॥

**शब्दार्थः** - अहं – घटोत्कचः, ननु – निश्चितम्, भीमसेनस्य- कुन्तिपुत्रस्य, पुत्रः = सुतः, , नभस्वतः - वायु, पौत्रः- पुत्रात्मजः, अस्मि - भवामि, इदानीं - अधुना, सुसन्नद्धः – तत्परः, तिष्ठ - भव, युद्धे – समरे, मत्समः- मत्सदृशः, नास्ति – न विद्यते।

**व्याख्या** - अहं = घटोत्कचनामकः (हिडिम्बोत्पन्नः); भीमसेनस्य = कुन्तीपुत्रस्य पाण्डवस्य, पुत्रः सुतः, नभस्वतः वायोः, पौत्रः = पुत्रात्मजः 'पोता' या 'नाती' इति लोकभाषायां प्रचलितः । ननु निश्चितमेव (अस्मि इति शेषः), इदानीं अधुना, अस्मिन् क्षणे, बेलायामित्यर्थः, सुसन्नद्धः = सुष्ठुप्रकारेण सावधानः, तत्परः सन्, तिष्ठ स्थितिं करु; नियुद्धे = बाहुयुद्धे, 'नियुद्धं बाहुयुद्धे' इत्यमरः । मत्समः मया सदृशः (कोऽपि जनः ) नास्ति = न विद्यते, न भवितुमर्हतीति भावः ।

**समास** - नभस्वतः = नभः (= आकाशः) अस्ति अस्य इति नभस्वान् ( = वायुः), तस्य नभस्वतः । सुसन्नद्धः सु = सम्यक्रीत्या सन्नद्धः सुसन्नद्धः, सु + सम् + नह्ल (धातोः) + क्तप्रत्यये कृते सति सुसन्नद्ध रूपं सिध्यति ।एकाङ्कः

---

घटोत्कचः - (भीमसेनं बद्धा )

**वजसि कथमिह त्वं वीर्यमुल्लङ्घ्य बाह्वो**

**गर्जे इव दृढपाशैः पीडितो मद्भुजाभ्याम् ।**

---

**अन्वयः** - त्वं (मम) बाह्वोः वीर्यम् उल्लङ्घ्य मद्भुजाभ्यां पीडितः दृढपाशैः (बद्धः) गज इव इह कथं व्रजसि।

**शब्दार्थः** - त्वं = भीमसेनः इति भावः, बाह्वोः – भुजयोः, उल्लङ्घ्य – अतिक्रम्य, मद्भुजाभ्यां – मम बाहुभ्.याम्, पीडितः – ताडितः, दृढपाशैः - दृढबन्धनैः, गज इव - हास्ति समः, इह- अस्मिन् वने, कथं – केनोपायेन, व्रजसि – गच्छसि।

**व्याख्या** - त्वं = भीमसेनः, वाह्वोः = (मम) भुजयोः, वीर्यं पराक्रमम्, उल्लङ्घ्य = अतिक्रम्य, लंघयित्वा, मद्भुजाभ्यां = मम बाहुभ्यां, पीडितः = प्रताडितः, दृढपाशैः = सुदृढबन्धनैः (बद्धः निगडितो वा), गजः हस्ती, इव = सदृशः ; इह = एतस्मिन् निर्जने वने, कथं केन उपायेन, केन विधिना; व्रजसि = निःसरसि, इतो गच्छसि ।

**समासः** - मद्भुजाभ्यां = मम भुजे इति मद्भुजे ( ष० त०) ताभ्यां मद्भुजाभ्यां । दृढपाशैः = दृढश्च ते पाशाः इति दृढपाशाः (कर्म० स०) तैः दृढपाशैः । उत् + लङ्घ + क्त्वा स्थाने ल्यप् कृते सति 'उल्लङ्घ्य' रूपं भवति।

---

भीमः- (आत्मगतम्) कथं गृहीतोऽस्म्यनेन । भोः सुयोधन ! वर्धते ते शत्रुपक्षः । कृतरक्षो भव । ( प्रकाशम् ) भोः पुरुष ! अवहितो भव ।

घटोत्कचः - अवहितोऽस्मि ।

भीमः- (नियुद्धबन्धमवधूय )

**व्यपनय बलदर्पं दृष्टसारोऽसि वीर !**

**न हि मम परिखेदो विद्यते बाहुयुद्धे ॥ ४६ ॥**

---

**व्याख्या** - सुया धन-सुखेन सुष्टु वा युध्यते इति सुयोधनः तत्सम्बुद्धौ हे सुयोधन ! = हे दुर्योधन ! सुयोधन, दुर्योधनस्य नामान्तरमस्ति । शत्रुपक्षः = शत्रोः पक्षः शत्रुपक्षः (ष० स०) अर्थात् पाण्डवपक्षः । कृतरक्षः- कृता रक्षा येन (बहु० स०) स कृतरथः कृतपरित्राणोपायः, पाण्डवपक्षः घटोत्कचमादाय वर्द्धते अतः त्वं

स्वकुलरक्षणे सन्नद्धो भव इति भावः । अवहितः = दत्तावधानः, योद्धुं तत्परो भव इत्यर्थः । नियुद्धबन्धम् मल्लयुद्धबाहुपाशम्, अवधूय = तिरस्कृत्य ।

**अन्वयः**- हे वीर ! दृष्टसारः असि (अत एव) बलदर्पं व्यपनय । हि बाहु- युद्धे मम परिखेदः न विद्यते ॥ ४६ ॥

**शब्दार्थः**- हे वीर ! – हे युद्धवीर ! त्वं – भवान्, दृष्टसारः – दृष्टबलः, असि – भवसि, बलदर्पं – बलाभिमानम्, व्यपनय – परित्यज, बाहुयुद्धे – मल्लयुद्धे, मम – भीमसेनः इति भावः ,परिखेदः - परिश्रमः, न नहि, विद्यते - भवति ।

**व्याख्या**- हे वीर ! युद्धवीर ! (त्वं) दृष्टसारः दृष्टबलः, 'सारो बले स्थिरांशे' इत्यमरः । घटोत्कचविशेषणपदम्, असि वर्तसे, भवसि इत्यर्थः । ( अत एव ) बलदर्पं = बलाभिमानं, बलगर्वं; व्यपनय = परित्यज, हि यतः, बाहुयुद्धे = मल्लयुद्धे, मम = पण्डुपुत्रभीमसेनस्य, परिखेदः = परिश्रमः, शरीर- श्रमः, न = नहि, विद्यते अस्ति, भवतीत्यर्थः ।

**समासः** - दृष्ट सारः - दृष्टः सारः यस्य स दृष्टसारः (बहुव्रीहि समासः)। बाहुयुद्धे-बाह्वोः युद्धं बाहुयुद्धं ( १० स०) तस्मिन् बाहुयुद्धे । बलदर्प- बलस्य दर्पं (१० स०) बलदर्पं । व्यपनय - वि अप + णी नी धातोः लोटि मध्यमपुरुषैकवचने रूपम् । परिखेदः - परि + खिद् + अ परितः खेदः परिखेदः ।

---

घटोत्कचः - कथमनेनापि न शक्यते हन्तुम् । किन्नु खलु करिष्ये । भवतु, दृष्टम् । अस्ति मातृप्रसादलब्धो मायापाशः । तेन बध्वनं नेष्यामि कुतः खल्वापः । भो गिरे ! आपस्तावत् । हन्त स्रवति । (आचम्य मन्त्र जपति ।) भोः पुरुष !

---

**व्याख्या** - मातृप्रसादलब्धः = मातुः प्रसादात् ( = कृपया) लब्धः प्राप्तः; मायापाशः = मायायाः पाशः (ष० स०) मायापाशः = ऐन्द्रजालिकबन्धनमित्यर्थः । कुतः खलु कस्मात् स्थानात्, आपः जलानि प्राप्तव्यानि, भो गिरे = हे पर्वत । आपस्तावत् । इत्यनेन घटोत्कचस्य अलौकिकशूरवीरता ध्वन्यते, यतः तस्य निर्जीवपदार्थस्योपरि प्रभूत्वं आसीत् ।

---

**मायापाशेन बद्धस्त्वं विवशोऽनुगमिष्यसि ।**

**राजसे रज्जुभिर्बद्धः शक्रध्वज इवोत्सवे ॥ ४७ ॥**

(इति मायया बध्नाति।)

---

**अन्वयः**- त्वं मायापाशेन बद्धः (सन् अधुना विवशः अनुतमिष्यसि । (अत एत्र इदानीं) उत्सवे शक्रध्वज इव रज्जुभिः बद्धः राजसे (त्वमिति शेषः) ॥ ४७ ॥

**शब्दार्थः** - त्वं - भीमसेनः, मायापाशेन- माया जालेन, बद्धः – बन्धने जातः, विवशः- पराधीनः, अनुगमिष्यसि – अनुगमनं करिष्यसि, उत्सवे – इन्द्रोत्सवे, कौमुदीमहोत्सवे , शक्रध्वज इव – इन्द्र पताका इव, रज्जुभिः – दामभिः, बद्धः सन् – बन्धने आयातः, शोभसे- राजसे ।

**व्याख्या** - त्वं = भीमसेनः, मायापाशेन = मायाजालेन, छलविद्यया; इन्द्रजालेन वा; मन्त्र-तन्त्रादिना वा; बद्धः बन्धने जातः, (सन् अधुना ) विवशः = पराधीनः, मम परवशः (भूत्वा) अनुगमिष्यसि = अनुगमनं करिष्यसि, चलिष्यसि मातुराहारयेति भावः । ( अत एव इदानीं उत्सवे = वार्षिकोत्सवे, इन्द्रमहनामकोत्सवे वा; शक्रध्वजः इन्द्रपताका, इव = सदृशः, रज्जुभिः = रश्मिभिः, दामभिः, बद्धः = बन्धने आयातः, राजसे = शोभसे, प्रकाशसे ।

**समासः** - माया पाशेन = मायायाः पाशः मायापाशः (ष० त० स०) तेन मायापाशेन । विवशः - विशेषेण वशः = वशंगतः अथवा विगतः वशः (= स्वतन्त्रभावः) यस्य सः विवशः (बहुव्रीहिसमासः) । शक्रध्वजः - शक्रस्य ध्वजः (ष० स०) शक्रध्वजः । अनुगमिष्यसि - अनु + गम् + लुट् मध्यमपुरुषैकवचने रूपम् ।

---

भीमः कथं मायापाशेन बद्धोऽस्मि । किमिदानीं करिष्ये । अस्ति मे महेश्वरप्रसादलब्धो मायापाशमोक्षो मन्त्रः । तं जपामि । कुतः खल्वापः भो ब्राह्मणकुमार ! आनय कमण्डलुगता-अपः ।

वृद्धः - इमा आपः ।

(भीमः आचम्य मन्त्रं जप्त्वा मायां मोचयति ।)

घटोत्कचः- अये पतितः पाशः । किमिदानीं करिष्ये । भवतु, भोः पुरुष ! पूर्वसमयं स्मर ।

भीमः- समय इति । एष स्मरामि । गच्छाग्रतः । (उभौ परिक्रामतः ।)

---

**व्याख्या**- महेश्वरप्रसादात्-महेश्वरस्य - शिवस्य प्रसादात्- कृपावशात्; लब्धः = प्राप्तः । मायापाशमोक्षः - मायाजाल (बन्धन) मुक्तिः, मायापाशस्य मोक्षः ष० स०) मायापाशमोक्षः । पूर्वसमयं पूर्वशपथं', 'समयाः शपथाचार- कालसिद्धान्तसंविदः' इत्यमरः, प्रतिज्ञावाक्यमित्यर्थः । स्मर = स्मृति- पथमानय । वृकोदरः - भीमः; वृकस्य 'भेड़िया' जन्तुविशेषस्य उदरमिव उदर- त्वात् भोजनाधिक्याच्च भीमस्य वृकोदर इतिसंज्ञा ।

---

वृद्धः पुत्रकाः किं कुर्मः । अयं गच्छति वृकोदरः ।

**आक्रम्य राक्षसमिमं ज्वलदुग्ररूप- मुग्रेण बाहुबलवीर्यगुणेन युक्तम् ।**

**एष प्रयाति शनकैरवधूय शीघ्र- मासारवर्षमिव गोवृषभः सलीलम् ॥** ४८ ॥

---

**अन्वयः** - ज्वलदुग्ररूपम् उग्रेण बाहुबलवीर्यगुणेन युक्तम् इमं राक्षसम् आक्रम्य एपः शनकैः सलीलम् आसारवर्ष शीघ्रम् अवधूय गोवृषभ इव प्रयाति ।। ४८ ।।

**शब्दार्थः** - ज्वलदुग्ररूपम् – ज्वलनशीलम्, उग्रेण - भयङ्करेण, बाहुबलवीर्यगुणेन - बाहुपराक्रमेण, युक्तम् – सहितम्, इमं- एनम्, राक्षसम् – घटोत्कचमिति भावः, आक्रम्य- पराभूय, एषः - भीमसेनः, शनकैः मन्दभावैः, सलीलम् - लीलायुक्तम्, आसारवर्षम् - धारावृष्टिम्, शीघ्रम् - झटिति, अवधूय - पराभूय गोवृषभ इव- श्रेष्ठगौरिव, प्रयाति-व्रजति।

**व्याख्या**-ज्वलदुग्ररूपम् = ज्वलनशीलं तथा रौद्ररूपम्, उग्रेण भयङ्करेण, 'भयङ्करं प्रतिभयं रौद्रं तूग्रम्' - इत्यमरः । वाहुबलवीर्यगुणेन = भुजबलपराक्रमेण, युक्तं = विभूषितं, इमं एनम्, राक्षसम्= घटोत्कचं, आक्रम्य पराभूय, स्वकीय पराक्रमेण जित्वाः इत्यर्थः । एषः = भीमसेनः, शनकैः = मन्दभावैः, सलीलम् = लीलापूर्वकं, लीलायुक्तं वा; आसारवर्षम् = धारावृष्टि, 'धारा सम्पात आसारः' - इत्यमरः; 'आसारः

स्यात्प्रसार वेगवर्षे सुहृद्बले' इति विश्वः । शीघ्रं = त्वरितमेव, अवधूय = पराभूय, उल्लंघ्य; गोवृषभ इव = श्रेष्ठगौरिव, प्रयाति = व्रजति ।

**समासः** - ज्वलदुग्ररूपम्-ज्वलत् उग्रं रूपं यस्य तं ज्वलदुग्ररूपम् । बाहुबलवीर्यगुणेन बाह्वाः बलवीर्यगुणः (ष० स०) तेन; सलीलम् - लीलया सहितं सलोलम् । आसारवर्षम्-आसारस्य वर्षं ( ष० स०) आसारवर्षम् । गोवृषभः- गोषु गवां वा वृषभः (= श्रेष्ठः) गोवृषभः । आक्रम्य-आक्रमु धातोः क्त्वा + ल्यपि कृते । आसार-आ सृ + अ आसारः ।। ४८ ।।

---

घटोत्कचः - इह तिष्ठ । त्वदागमनमम्बायै निवेद्यामि । भीमः बाढम्, गच्छ ।

घटोत्कचः - (उपसृत्य ) अम्ब ! अयमभिवादये । चिराभिलषितो भवत्या आहारार्थमानीतो मानुषः ।

(प्रविश्य)

हिडिम्बा -जाद ! चिरं जीव । [ जात ! चिरं जीव । ] घटोत्कचः - अनुगृहीतोऽस्मि ।

हिडिम्बा-जाद ! कीदिसो माणुनो आणोदो । [ जात, कीदृशो मानुष आनीतः । ]

घटोत्कचः - भवति 'रूपमात्रेण मानुषः । न वीर्येण ।

हिडिम्बा - किं बम्हणो । [ कि ब्राह्मणः । ]

घटोत्कचः- न ब्राह्मणः ।

हिडिम्बा- आदु थेरो [ अथवा स्थविरः । ]

घटोत्कचः- न वृद्ध ।

हिडिम्बा - किं बालो । [ कि बालः ।]

---

**व्याख्या**-रूपमात्रेण मानुषः । न वीर्येण - अर्थात् आकृत्या मनुष्योऽयं वर्तते । न तु अयं पराक्रमेण । इस कथन का अभिप्राय प्रशंसा और निंदा दोनों ध्वनित होता है। मनुष्य से अधिक इसमें बल-पराक्रम् है यह स्तुति हुई। परन्तु इसमें जरा भी वीर्य नहीं है यह निन्दा वचन हुआ अतः साहित्यकारों की दृष्टि से यहाँ 'काकूक्ति' है।

स्थविरः = वृद्धः, 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि' इत्यमरः ।

---

घटोत्कचः - न बालः ।

हिडिम्बा - जई एव्वं पेक्खामि दाव णं। [यद्येवं पश्यामि तावदेनम् ।]

(उभौ परिक्रामतः ।)

हिडिम्बा = किं एसो मांणुसो आणीदो । [ किमेष मानुष आनीतः । ] घटोत्कचः - अम्ब ! कोऽयम् ।

हिडिम्बा उम्मत्तअ दव्वदं खु अम्हाअं । [ उन्मत्तक दैवतं खल्व- स्माकम् । ]

घटोत्कचः आः कम्य दैवतम् ।

हिडिम्बा तव अ, मम अ । [ तव च, मम च । ]

---

**व्याख्या**- किमेषः मानुष आनीतः किमयं मनुष्यः आनीतः त्वयेति शेषः । अभिप्राय यह कि हिडिम्बा अपने पति को देखकर मन में अति संकोच्च से झप जाती है और आश्चर्यपूर्ण भाव-भंगिमा में कहती है- 'क्या यही मनुष्य तुमने लाया है !!!' । इसीलिए वह घटोत्कच को पागल (उन्मत्तक) कहकर पुकारती है ।

दैवतम् = देवता, 'अमरा निर्जरा देवा स्त्रियाम्' इत्यमरः । स्त्रियों के लिए 'पति' हो तुलना कीजिए भास के निम्नोक्त वचन से :- दैवतानि पुंसि वा देवता 'देवता' है। इस कथन की

'प्रष्टुमिच्छामि दैवतं परमं मम ।' प्रतिमा० ४-३

अतः हिडिम्बा के लिए यह बहुमानपूर्ण विषय है। उसकी नज़र में भीम की प्रतिमा 'ईश्वर' के रूप में विराजती है।

---

घटोत्कचः कः प्रत्ययः ।

हिडिम्बा--अअं पश्चओ । जेदु अय्यउत्तो । [ अयं प्रत्ययः ! जय- त्वार्यपुत्रः । ]

भीमसेनः- (विलोक्य) का पुनरियम्। अये, देवी हिडिम्बा ।

**अस्माकं भ्रष्टराज्यानां भ्रमतां गहने वने ।**

**जातकारुण्यया देवि ! संतापो नाशितस्त्वया ।। ४९ ॥**

**व्याख्या**-प्रत्ययः = विश्वासः, 'प्रत्ययोऽधीनशपथज्ञानविश्वास हेतुषु' इत्यमरः । आर्यपुत्र-पति को सम्बोधित करने के लिए यह शब्द प्रयुक्त होता है। भरतनाव्यशास्त्र के अनुसार नाटकों में नटी सूत्रधार को 'आर्यपुत्र' कहती है।

**अन्वयः** - देवि ! गहने वने भ्रष्टराज्यानां भ्रमतां अस्माकं जातकारुण्यया त्वया संतापः नाशितः ॥ ४९ ।।

**शब्दार्थः** - देवि ! – हे देवि!, गहने - कानने, वने -अरण्ये, भ्रष्टराज्यानां – राज्यच्च्यानाम्, भ्रमतां – इतस्ततः धावताम्, अस्माकं -मदीयानाम् युधिष्ठिरादिबान्धवानाम्, जातकारुण्यया - समुत्पन्नदयया, त्वया – हिडिमबया इति भावः, संतापः - क्लेशः, नाशितः- दूरीकृतः।

**व्याख्या** - देवि ! = हिडिम्बे !, गहने कानने, घनघोरे वने = अरण्ये, 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । अष्टराज्यानां = राज्य- च्युतानां, दुर्योधनेन राज्यबहिष्कृतानां वा, अमतां = इतस्ततः धावतां, अस्माकं = मामकीनां युधिष्ठिरादिबन्धवानां, जातकारुण्यया = समुत्पन्नदयया, दयादाक्षिण्यया वा; त्वया = त्वत्सदृशी हिडिम्बया, संतापः वनवासजनितकृशः, नाशितः = दूरीकृतः, विनष्टोजातः; अर्थात् वनवासकाले त्वामादाय वयम् अपूर्व सुखम् अनुभवाम इत्यर्थः । समासः - भ्रष्टरराज्यानां - भ्रष्टं राज्यं येषां ते भ्रष्टराज्याः येषां (बहुव्रीहिः)। जातकारुण्यया- जातं कारुण्यं यत्रः (यस्यां वा) सा जातकारुण्या तया जातकारुण्यया (बहु० स० ) ।

हिडिम्बे ! किमिदम् ।

हिडिम्बा - (कर्णे) अय्यउत्त! ईदिसं विअ । [आर्यपुत्र ! ईदृशमिव । ]

भीमः - जात्या राक्षसी, न समुदाचारेण ।

हिडिम्बा -- उम्मत्तअ! अभिवादेहि पिरं । [ उन्मत्तक अभिवादयस्व पितरम् । ]

घटोत्कचः - भोस्तात !

**अज्ञानाप्तु मया पूर्वं यद्भवान्नाभिवादितः ।**

**अस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि ।॥ ५० ॥**

---

**व्याख्या**- तात्या जन्मना, राक्षसी राक्षसकुलोत्पन्ना, नं नहि, समुदा- चारेण शिष्टाचारेण आन्तरिकमनोभावेन वा, नहि स्वाभावेनेत्यर्थः । [ सम् + आचर + घञ् ] पितरम् = स्वीयजनकं, अभिवादयस्व = प्रणामं करु ।

**अन्वयः**- मया तु अज्ञानात् पूर्वं यत् भवान् न अभिवादितः, अस्य पुत्रापराधस्य प्रसादं कर्तुम् अर्हसि ।॥ ५० ॥

**शब्दार्थः** - मया तु - घटोत्कचेन, अज्ञानात् - परिचयाभावात्, पूर्वम् - प्राक्, यत्- तत्, भवान्- भीमसेनः इति भावः,न - नहि, अभिवादितः – प्रणामितः, पुत्रापराधस्य-पुत्रेण कृत पराधस्य, प्रसादं - प्रसन्नताम्, कर्तुम्- कतरणाय, अर्हसि – निपुणोऽसि।

**व्याख्या**-मया = हिडिम्बापुत्रेण घटोत्कचेन, अज्ञानात् = परिचया- भावात्, पूर्वं = सर्वप्रथमम्, यत् भवान् भीमसेनः, न अभिवन्दितः = न प्रणमितः (एतस्मात्) अस्य मम, पुत्रापराधस्य = पुत्रकृतापराधस्य, प्रसादं = प्रसन्नतां, 'प्रसादस्तु प्रसन्नता' इत्यमरः; कर्तुम् = करणाथ, अर्हसि = निपुणोऽसि, समर्थोऽसि, अर्थात् सर्वतो भावेन ममापराधं चमयितुं योग्योऽसि इत्यर्थः ।

**समासः** - अज्ञानात्-न ज्ञानम् अज्ञानम् (नञ् स०) तस्मात् अज्ञानात् नाभिवादितः- न अभिवादितः नाभिवादितः । पुत्रापराधस्य-पुत्रस्य अपराधः (५० स०) पुत्रापराधः अथवा पुत्रेण कृतः अपराधः पुत्रापराधः तस्य पुत्रापराधस्य ।

---

**अहं स धार्तराष्ट्रवनदवाग्निर्घटोत्कचोऽभिवादये । पुत्रचापलं क्षन्तु मर्हसि ।**

---

**व्याख्या** - धार्तराष्ट्रवनदवाग्निः- धृतराष्ट्रस्य अपत्यानि धार्तराष्ट्रापत्यानि (१०स०) तानि एव वनानि इति धार्तराष्ट्रवनानि तेषां ( = धार्तराष्ट्रवनानां) तेषु वा दवाग्निः ( = वनाग्निः) इति धार्तराष्ट्रवनदवाग्निः । अर्थात् धृतराष्ट्रपुत्र- विपिनवनाग्निः, 'दवोदावौ वनारण्यवह्नि' इत्यमरः (३-२५६) । धार्तराष्ट्राः एव वनम् = धृतराष्ट्

के पुत्र लोग ही वन हैं और उन वनों में घटोत्कच ही 'दावाग्नि' रूप में है (घटोत्कच एव दावाग्निः)। 'धार्तराष्ट्रवन' में कर्म- धारय समास है। 'धार्तराष्ट्रवने दवाग्निः अथवा धार्तराष्ट्रवनस्य देवाग्निः' इस प्रकार सप्तमी और षष्ठी तत्तुरुप करके भी समझा जा सकता है। पुत्रचापलं = पुत्रस्य चापलं = चाञ्चल्यं, क्षन्तुं = सहितुं, क्षमा कर्तुं वा; अर्हसि योग्योऽसि। यहाँ पर 'चापल' शब्द का प्रयोग देखते हुए कालिदास प्रयुक्त निम्नोक्त प्रयोग स्वतः स्मृति पथ में आ जाता है। यथा -

तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः। (रघु० ११९)

---

भीमसेनः- एह्येहि पुत्र व्यतिक्रमकृतं क्षान्तमेव। (इति परिष्वज्य) अयं स धार्तराष्ट्रवनदवाग्निः। पुत्रापेक्षीणि खलु पितृहृद्यानि। पुत्र, अतिबलपराक्रमो भव।

घटोत्कचः - अनुगृहीतोऽस्मि। वृद्धः- एवं भीमसेनपुत्रोऽयं घटोत्कचः।

---

**व्याख्या**- व्यतिक्रमकृतं दोषकृतं, अपर। धकृतं वा। यहाँ पर व्यतिक्रम का शाब्दिक अर्थ 'भंग' है तथापि उसका अर्थ 'दोष' लिया गया है (द्र० गुजराती संस्करण)।

पुत्रापेचीणि खलु पितृहृदयानि - पितुः हृदयानि (१० स०) इति पितृ- हृदयानि, खलु = निश्चयेन पुत्रापेचीणि = पुत्रार्थिनी अर्थात् पुत्रप्राप्त्यर्थ आतुराणि भवन्ति इति शब्दार्थः परन्तु इदं वाक्यं साभिप्रायिकम् अतिगूड- आषभरितमस्ति। अथ को नामा पुत्रः ? इत्युच्यते- 'पुन्नाम नरकात् श्रायते 'इति पुत्रः' अर्थात् सुपुत्रः एव स्वयोग्यताबलेन पितरं प्रीणाति अतः अत्र 'पुत्र' पदेन 'सुपुत्रः' परामृश्यते। तदा अयमर्थो भवति यत् पितुः हृदयं सदैव सुपुत्रं बाँछति, तस्मै सर्वदा चिन्तितो भवति, सुपुत्रचिन्तायां प्राणानपि जहाति यथा- रामाय दशरथः। अतएव अग्रिमेण वाक्येन भीमः घटोकन हार्दिक- शुभाशिषा विभूषयन् कथयति - 'अतिबलपराक्रमो भव' इति। अर्थात् त्वं अतिशक्तिसामर्थ्यवान भूत्वा अस्मिन् लोके विचर इत्यर्थः।

---

भीमः - पुत्र ! अभिवादयात्रभवन्तं केशवदासम्।

घटोत्कचः - भगवन्नभित्रादये।

वृद्धः - पितृसदृशगुणकीतिर्भत्र ।

घटोत्कचः - अनुगृहीते ऽस्मि ।

---

**व्याख्या** - अत्रभवन्तं पूज्यतमं, केशवदासम्= केशवदासनामकं ब्राह्मण- मित्यर्थः पितृसदृशगुणकीर्तिर्भव- पितुः सदृशं गुणं कीर्तिश्च यस्य स पितृसदृश- गुणकीर्तिः = पितृसमानगुणयशी (गुणयशशीलो वा) भव भूयाः त्वमिति शेषः ।

---

वृद्धः- मोः वृकोदर ! रक्षितमस्मत्कुल, स्त्रकुलमुद्धृतं च । गच्छाम- स्तावत् ।

भीमसेनः -

**अनुग्रहान्त भवतः सर्वमासीदिदं शुभम् ।**

**आश्रमोऽदूरतोऽस्माकं तत्र विश्रम्य गम्यताम् । ५१ ॥**

---

**व्याख्या**- वृकोदर = हे भीमसेन ! रक्षितमस्मत्कुलम्-अस्मत् = अस्माकं, कुलं = वंशं, रक्षितम् = सर्वतो भावेन परिपालितम्, अतः तव एतत् कार्य सदा सर्वदा श्लाघनीयं वर्तते यतः त्वं क्षत्रियः स्वपराक्रमेण अर्थात् क्षात्रधर्मेण ब्राह्मण- कुलं मृत्योर्मुखात् उद्धृतम्, अनेककार्यव्यापारेण त्वया सकुलमपि अर्थात् पाण्डव- कुलमपि, उद्धतम् = उच्चपदे स्थापितं अतः मम वृद्धब्राह्मणस्य शुभकामना सदा त्वत्कृते वर्तते । गच्छामस्तावत् = स्वस्थमनसा स्वकुटुम्बैः सह यथा- भिलषितदेशमित्यर्थः ।

**अन्वयः**:- तु भवतः अनुग्रहात् इदं शुभं सर्वम् आसीत् । अस्माकं आश्रमः अदूरतः (अस्ति, अत एव तत्र विश्रम्य गम्यताम् ॥ ५१ ॥

**शब्दार्थः**:- तु - परन्तु, भवतः – भवदीय, अनुग्रहात् – कृपाकटाक्षात्, इदं - एतत्, सर्वं-समस्तम्, शुभं- मङ्गलम्, आसीत् – अभूत्, अस्माकं - मामकीयम्, आश्रमः - निवासस्थानम्, अदूरतः – पार्वे, तत्र - तस्मिन् आश्रमे, विश्रम्य – विश्रान्तेः परं, गम्यताम्- गमनं क्रियताम्।

**व्याख्या** - तु = किन्तु, भवतः = भवदीय, अनुग्रहात् = कृपावशात्, इदं = एतत्, सर्वम् = समस्तं, शुभं = मङ्गलं, भासीत् अभूत् : अर्थात् ब्राह्मणाशीर्वादफलमेतदस्ति । अस्माकम् = मामकीनां

पाण्डवानामित्यर्थः, आश्रमः = निवासस्थानम्, अदूरतः = समीपमेव, (अस्ति अतएव तत्र = तस्मिन् आश्रमे, विश्रम्य = मार्गपरिश्रमखेदं दूरीकृत्य, किञ्चित् कालं विरग्य वा; गभ्यताम् = गमनं क्रियताम् अर्थात् निर्भयननसा सुखपूर्वकं गन्तव्यस्थानं गच्छन्तु भवन्तः स्वकुटुम्बैरितिशेषः ।

---

वृद्धः - कृतमातिथ्यमनेन जीवितप्रदानेन तस्माद् गच्छामस्तावत् ।

भीमः - गच्छतु भवान् सकुटुम्बः पुनर्दर्शनाय ।

वृद्धः- बाढम् । प्रथमः कल्पः ।

(निष्क्रान्तः सकलत्रपुत्रः केशवदासः । )

---

**व्याख्या** - कृतमातिथ्यमनेन जीवितप्रदानेन अनेन एवं विधिना जीवितप्रदानेन = जीवनदानेन, आतिथ्यं = अतिथिसत्कारं, कृतं = सम्पादितम् (त्वयेति शेषः) अर्थात् प्राणदानं सर्वेषु दानेषु श्रेष्ठं वर्तते तथा प्राणदानसमं न किमपि आतिथ्यमिति । अतिथिः पूज्यतमो वर्तते । त्वम् न केवलं अतिथीनां भोजनादिना संतोषयितुं समर्थोऽसि अपितु तेषां संरक्षणेऽपि समर्थोऽसि अतएक अनेन व्यवहारेण वयं संतोषमनुभवामः ।

सकुटुम्बः - कुटुम्बैः सह वर्तते यः सकुटुम्बः = परिवारसहितः । पुनर्दर्श- नाय = पुनरपि अत्र तव आगमनं भवेत् इति कामनाम् अहं करोमि अथवा द्वितीयवारमपि तव दर्शनं वांछामि इति भावः । इदं शिष्टाचार परम्पराषु रूढीवाक्यमस्ति । अर्थात् 'गच्छतु भवान् सकुटुम्बः (एकाकी वा) पुनदर्शनाय'

---

भीमः - हिडिम्बे ! इतस्तात्रत् । वत्स घटोत्कच ! इतस्तावत् । तत्र- भवन्तं केशवदासम् आश्रमपदद्वारमात्रमपि संभावयिष्यामः ।

(भरतवाक्यम्)

**यथा नदीनां प्रभवः समुद्रो यथाहुतीनां प्रभवो हुताशनः ।**

**यथेन्द्रियाणां प्रभवं मनोऽपि तथा प्रभुर्नो भगवानुपेन्द्रः ।। ५२ ।।**

(निष्क्रान्ताः सर्वे।)

समाप्तोऽङ्कः

महाकविभासविरचितः मध्यमव्यायोगः एकाङ्कः सम्पूर्णः ।

---

**व्याख्या** - आश्रमपदद्वारमात्रम् = आश्रमस्य प्रमुखद्वारपर्यन्तमित्यर्थः । संमानयामि -- (सम् + भावधातोः (प्रेरणार्थक) लटि (उत्तमपु० ए० ) = सम्मानयामि, बहुमानयामि, सत्कारयामि = आदर दे दूँ, सत्कार कर दूँ। अन्वयः- यथा नदीनां समुद्रः प्रभत्रः, (अस्ति), यथा आहुतीनां हुताशनः प्रभवः, यथा इन्द्रियाणां मनः अपि प्रभवं तथा नः भगवान् उपेन्द्रः प्रभुः (अस्ति) ॥ ५२ ॥

**शब्दार्थः** - यथा – येन कारणेन, नदीनां - सरिताम्, समुद्रः - सागरः, प्रभवः - स्वामी, यथा- येन कारमेन, आहुतीनां - होमद्रव्यानाम्, हुताशन - अग्वनिः, प्रभवः- स्थानम्, इन्द्रियाणाम्- वाक्-पाणि-पादादीनाम्, अपि- एवम्, मनः – चित्तम्, प्रभवः =-स्वामी, तथा – तद्वत्, नः – अस्माकम्, भगवान् – ईश्वरः, उपेन्द्रः – श्रीविष्णुः।

**व्याख्या** - यथा = येन विधिना, नदीनां सरित् आपगा' इत्यमरः । समुद्रः सागरः, आपगानां, सरितां वा, 'नदी 'समुद्रो' सिन्धु सारवान्

सागरोऽर्णवः', इत्यमरः । प्रभवः स्वामी, जन्सहेतुः उपलब्धिस्थानम्, 'स्याज्जन्महेतुः प्रभवः' इत्यमरः । आश्रयो वा, आहुतीनां होम-द्रव्याणां, प्रभवः = स्थानम्, हुताशनः = अग्निः, 'हुतभुक्, अग्निर्वैश्वानरो वह्नि** हुतभुग्दहनो हव्यवानः', इत्यमरः । इन्द्रियाणां = वाक्-पाणि-पादादीनां; प्रभवं = स्वामी, सनः = चित्तं, मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।' इति वचनात् समस्तशरीरजन्मव्यापारेषु मनसः प्राधान्यादितिभावः, मन एव तेषामाश्रयस्थानमस्ति तदेव प्रेरयति । नः अस्माकम्, नटप्रयोक्तृणां, अभिनेता-दर्शकादीनां च । उपेन्द्रः विष्णुः, 'विष्णुर्नारायण उपेन्द्र इन्द्रा- चरजः' इत्यमरः । प्रभुः = जन्महेतुः, प्रलयकाले सर्वे जीवा विष्णोरुदरे तिष्ठन्ति पुनः सर्जनकाले ततः प्रादुर्भवन्ति इति पुराणकथानुसंधेया । भगवान् - षडैश्वर्यगुणसम्पन्नः भगवान्, ईश्वरः । कौशकार अमरसिंह ने 'भगवान्' पद का उल्लेख बुद्ध के नाम में किया है। परन्तु यहाँ 'उपेन्द्र' का विशेषवाचक पद होने के कारण यहाँ षड्

ऐश्वर्य गुणों से सम्पन्न जो है वही ग्रहण होगा। अतः 'विष्णु भगवान्' ही अर्थ उचित है। इदं भरतवाक्यमस्ति । अनेन नाटकाभिनयसमाप्तौ सामाजिकेभ्यो नटेन आर्वचनं दीयते ।

**समासः** - प्रभवः- प्रभवतीति प्रभवः (= कारणम्) । प्र+भू+ अ (पचाद्यच्)। हुताशनः- हुतम् (अग्नौ हवनीभूतं) अश्नाति (भक्ष- यति-भस्मसाध्करोति वा । यः स हुताशनः । भगवान्--भगाः = षड् ऐश्वर्याणि यस्य स भगवान् । उपेन्द्रः इन्द्रस्य समीपम् उपेन्द्रः, अर्थात् इन्द्रस्य लघु आता अस्ति इति पौराणिकी कथा स्मर्तव्या ।

**सूचना**-भासकवेः प्रामाणिकं जीवनवृत्तं कृतिवैशिष्ट्यश्च अस्य ग्रन्थस्य भूमिकायां द्रष्टव्यम्, एवं मध्यमव्यायोगशब्दार्थश्च तत्रैव द्रष्टव्यः । उद्धृतश्लोकानां व्याख्या तु मूलत एव बोध्या ।

**मध्यमव्यायोगस्येतिष्वृत्तम्**

**नाटकरङ्गस्थानम् : कुरुजाङ्गलप्रदेशस्य निर्जन वनस्थली ।**

नान्दीपाठानन्तरं रङ्गमञ्चोपरि सूत्रधार आगच्छति । मङ्गलस्तुत्या स दर्श- कानां मनसि कौतूहलं तथा जिज्ञासाभावमुत्पादयति । तवैव नेपथ्ये "भोः तात ! कोनु खल्वेषः" इति ध्वनिर्भवति । सूत्रधारः ज्ञातुं प्रयतते, भोशब्दोच्चारणेन हदं निश्चिनोति यत् अस्ति कश्चित् ब्राह्मणः यः केचित् पापात्मना परिपीड्यते । तावत् पुनः नेपथ्ये स एव ध्वनि र्भवति - 'भोः तात. आदिः ।

ततः सूत्रधारः स्पष्टमेव उद्घोषयति यत् हिडिम्बारणिसम्भूतो राक्षसाग्निर- कृतवैरंब्राह्मणञ्जनं वित्रासयति । भोः कष्टम् !!

एनं दृष्ट्वा अयं वृद्धः ब्राह्मणः तथैव आकुलो भवति यथा व्याघ्रं दृष्ट्वा वत्सधेनु- संयुक्तः कश्चित् वृद्धो वृषभः सन्त्रस्तो भवति ।

नाटकीयस्थापनानन्तरं रङ्गभूमौ एकः वृद्धब्राह्मणः त्रिभिः युवपुत्रै वृद्धपरन्यः सह प्रविशति, तत्पश्चादेव एकः अतिभयङ्करः रौद्ररूपधारी साक्षात् यमस्वरूपः, प्रलयंकारी मेघ इव घटोत्कचनामकः राक्षसः तं वृद्धब्राह्मणपरिवारमाक्रमितुं समागच्छति ।

दर्शकानां हृदि जिज्ञासा प्रादुर्भवति यत् अस्मिन् निर्जने वने एनं ब्राह्मण- परिवारमयं घटोत्कचः कथं सन्तापयति ? अस्य समाधानमग्रे भवति ।

एतस्मिनन्तरे घटोत्कचः कथयति - भो ब्राह्मण ! तिष्ठ, तिष्ठ !! क्क पलायसे ? त्वयि स्वपरिवारान् रक्षितुं सामर्थ्यं नास्ति । त्वं ममाग्रे तथैवासि यथा कुद्धस्थ गरुडस्य अग्रे चैत्रस्तः सपत्नीकः नागः । अतः हे ब्राह्मण ! अग्रे मा गच्छ, मा गच्छ !! घटोत्कचस्य वचनं श्रुत्वा ब्राह्मणपरिवारः भयभीतः आसीत् । स्वपरिवारस्य रक्षोपायमनुपलभ्य केशवदासनामा ब्राह्मणः घटोत्कचसमीपें गत्वा मोक्षमार्गं पृच्छति । स एवं कथयति यत् मम मातुः पारणार्थं स्वपरिवारेषु मध्ये कमपि एकं यदा दास्यसि तदा मुक्ति र्भविष्यति ।

वृद्धः ब्राह्मणः तत्प्रस्तावं श्रुत्वा प्रथमं आस्मानं समर्पयितुमभिलषितवान् । परन्तु वृद्धत्वात् तेन अस्वीकृतः । स राक्षसः स्त्रीजातित्वात् ब्राह्मणीमपि न श्वीचकार । अस्मिन् कार्ये बदा ज्येष्ठपुत्रः समुद्यतः आस्मोत्सर्गाय तदा पित्रा स्वय- मेष वारितः । यतः ज्येष्ठस्य उत्तराधिकारी त्वहमस्मि । ब्राह्मणी स्वलघुपुत्रं दातुं कथमपि न वाम्छति, यतः स अतीवप्रियः अस्ति। अधुना तु मध्यम पुत्र एव शेषः ।

स जननीजनकयोर्ममत्वमात्मनि अनुपलभ्य स्वयमेव तेन राचसेन सह गन्तुमियेष । यतः स मध्धमः मातापित्रोरनिष्टं न वाञ्छति । मध्यमपुत्रस्य प्रस्तावं श्रुत्वा घटोत्कचः अतिहर्षति, तथा तेन ब्राह्मपुत्रेण सह सद्भावं दर्शयति । अनुगमनात्पूर्वं स जलं पातुं सरोवरं गमनाय तस्मै आदेशं ददौ। अनेन प्रतीयते यत् तस्मिन् क्रूरहृदि घटोत्कचे क्रूरभावस्य शिखा मन्दं मन्दं ज्वलति । घटोत्कचस्य इयं कोमलावृत्तिः सामजिकानां हृदि अपूर्वा रसानुभूतिमुत्पादयति ।

मध्यमपुत्रस्यागमने यदा कश्चिद् विलम्बो जातः तदा घटोत्कचः मनसि चिन्तयामास, यतः स मम मातुः आहारवेलामतिक्रामति । अतः स घटोत्कचः 'मध्यम', 'मध्यम' इति नाम्ना उच्चस्वरेण आह्वयामास । तत्सनिकट एक् भीमः आसीत् । यदा स राक्षसः तृतीयवारमाह्वयामास तर्हिं भीमः स्वयमेव समुपस्थितः

भीमसेनागमनानन्तरं ब्राह्मणपुत्रोऽपि समागतः । यदा ब्राह्मणपुत्रमादाय घटोत्कचः श्वमातुः पार्श्वे चलति, तदा वृद्धः ब्राह्मणः भीममुपगम्य ब्राह्मणकुलं परि- त्राणाय प्रार्थयति । भीमः ब्राह्मणाय अभयदानं ददाति, तत्स्थाने च स्वयमेष गन्तु मुद्यतो बभूव । यदा स राक्षसः भीमं चलितुं कथयति तदा भीमस्तं कथयति - शक्तिश्चेत् बलात्कारेण मां नय । तदनन्तरमुभयोर्मध्ये द्वन्द्वयुद्धं बभूव । परन्तु स्त्र राक्षसः बलप्रयोगेण भीमं नेतुमसमर्थो जातः ।

तत्पश्चात् यदा स घटोत्कचः प्रतीज्ञावाक्यं स्मारयति तदा तेन सह भीमः चलितुं प्रवृत्तः । घटोत्कचः भीमं स्वगृहद्वारे संनिवेश्य अन्तःपूरं गत्वा अम्बायै चिराभिलषिताहारं निवेदयति, माता साधुवादं करोति, तथा पृच्छति च - 'वत्स !' कीदृशो मानुष आनीत' इति । घटोत्कच उत्तरयति - वाङ्मात्रेण आकृत्या वा मानुषः म वीर्येण । पुनः पृच्छति - किं ब्राह्मणः, किं वृद्धः अथवा बालकः ?

घटोत्कचः न किमपि प्रत्युत्तश्यति । तदा हिडिम्बा स्वयं गृहात् बहिरागस्य आगतजनं पश्यति । सा भीमं दृष्ट्वा सहर्षं घटोत्कचमुक्तवती-किमेषः मानुष आनीतः ? घटोत्कचः पृच्छति-अग्ब, कोऽथम् ? हिडिम्बा कथयति दैवतं खल्वस्माकम् । अत्तो हे उन्मत्तक ! अभिवादय पितरम् । घटोत्कचः प्रणमतिं स्वचापत्यं तन्तुं प्रार्थयत्ति च । भीमश्च हिडिम्बां प्रति कृतज्ञतां ज्ञापयति तत्कृतं शिष्टाचारं प्रशंसति । तत् पश्चात् भीमः घटोत्कचं परिष्वज्य प्राह - हे पुत्र, एहि, एहि, तव कृतम् अपराधं सान्तमेव । अधुना त्वमत्रभवन्तं केशवदासमभिवादय, अभिवादय । घटोत्कच्त्तः ब्राह्मणमभिवादयति । स ब्राह्मणः घटोत्कच्चं 'पितृसमः कीर्तिमान् भव' इतिवचसा आशिषति ।

अन्ते च भीमः स्वोदारभावेन ब्राह्मणपरिवारं सन्तोष्य गन्तव्यस्थानं प्रेषितवान् । एवं निम्नोक्तमङ्गलवाक्येन अयं व्यायोगः समाप्तिं गच्छति -

**यथा नदीनां प्रभवः समुद्रो यथाहुतीनां प्रभवो हुताशः ।**

**यथेन्द्रियाणां प्रभवं मनोऽपि तथा प्रभुर्नो भगवानुपेन्द्रः ।।**

# खण्डः ५

खण्डेऽस्मिन् मध्यमव्यायोगस्य पूर्णतः चर्चापरं छात्राणाम् अवबोधनाय व्यायोगे उल्लिताः विविधाः रसाः, तेषां च प्रयोगः मार्मीकरीत्या यथा नाट्यकारेण कृतं तद्विषये छात्राणां नूनं विशेषज्ञानं सम्भवति। तत्रापि विवधालङ्काराणामपि नाट्यसौन्दर्यप्रतिपादनाय यथा कृतं नाट्यकारेण तस्मिन् च छात्राणां सामर्थसम्पादनं सम्भविष्यति। छन्दशास्त्रे विविधछन्दसमूहानां तेषां तेषां प्रयोगः व्यायोगे तु दरीदृश्यते। पात्रपरिशीलनम्, मूलकथावस्तुविवेचनम् इति विशेषांशः छात्राणां व्यायोगस्य पठनमाध्यमेन स्वतः सम्प्राप्तिः भविष्यति।

**सन्दर्भग्रन्थसूची-**


1. **मध्यमव्यायोगः- आर. एस. वाद्यार पालक्काटु।**


**सहायकग्रन्थसूची-**


1. **मध्यमव्यायोगः- आचार्य कपिल देव गिरि चौकम्बा, पब्लिशर, वाराणासी।**